
गूढार्थदीपिका
(देवीमाहात्म्यव्याख्या)
GUDHARTHADIPIKA
(Commentary of Devimahatmya)



MADRAS GOVERNMENT ORIENTAL MANUSCRIPTS SERIES - 72

GŪDHĀRTHA DĪPIKA
COMMENTARY OF DEVIMĀHĀTMYĀ

Editor
S. SESHADRI
Sanskrit Pandit,
Government Oriental Manuscripts Library, Madras-5

General Editor
Natana Kasinathan, M.A.,
Director,
Department of Archaeology
Madras - 113

Price Rs.80/-

Government Oriental Manuscripts Library, Madras-5
1995

GENERAL EDITOR'S NOTE

Gudarthadipika is a commentary for Devimahatmya which is a legend found in Markandeyapurana. The name of the commentator is unknown. This commentary is complete in 13 chapters.

We thank the Government of Tamil Nadu specifically Mr.S.P.Ilangovan, I.A.S., and R.Christodass Gandhi I.A.S. for bringing out this publication. We also thank Dr.S. Soundarapandian, Curator for bringing out this work and S.Seshadri, Sanskrit Pandit who has taken pains to edit this work.

I hope that the Sanskrit world will find this volume quite useful.

By

Natana Kasinathan

PREFACE

Govt. Oriental Mss Library is a great institution, which pocessess a member of valuable manuscripts in palm leaf & Paper. This may be treated as the biggest manuscript library is South India as it has a collection of nearly 75,000 manusripts.

Sofar 71 books have been published in the Govt.Oreintal manuscript series. This is the 72rd book in that senis.

I thank Mr.P.C. Ilangovan I.A.S. the former Secretary, Tamil Development Department and the present Secretary Mr.R. Christodass Gandhi I.A.S. for bringing out this publication.

I also thank thiru-Natana, Kasinathan, Director, Dept.of Archaeology, Tamil Nadu Govt.

I thank S. Seshadri, Sanskrit Pandit, who edited the work and prepared the press copy of this manuscript.

S. Soundarapandian

M.A. (Tamil) M.A.(Eng).B.Ed.
Dip. in Skt. Phd.

Vaidyanatha Dhikshita - A Pioneer in Research Methodology

Dr.S. Soundarapandian,
M.A.,M.A.,B.Ed., Dip.Skt.,Ph.D.,
Curator
Govt.Oriental Manuscripts Library
University Library Buildings
Madras- 600 005.

We believe today that the research methodology is quite foreign. This is untrue. Vaidyanatha Dhikshita's (C. 16th C.A.D.) Smrtimuktapalam strongly refutes this.

The folowing research nuances could be viewed in Dhikshita's prose treatise, Smrtimuktapalam :-

1. Quoting others' views
2. Listing of ideas
3. Contents, subject wise
4. Separation of topics
5. Elimination of irrelevent points
6. Usage of apt words.
7. Discussing the contradictory views
8. Concluding the research

Let us furnish examples here which are in proof of a few, if not all, of the above technicalities.

An example for his quoting of various views :-

"Japali told that those who want all benefits in life should utter the name of Hari. Viswamitra revealed that although there are many famous thirthas, they all will not be equal to the utterance of 'Rama'." (p.396)

While quoting, he never searches for his like-minded sayings. In fact, he admits even contradictory ideas. This is a rare phenomenon which even today we cannot find in modern theses.

While quoting authors, Shikshita uniformly follows two kinds of methods is which he first incises the name of the author whom he quotes and then the author's opinion; sometimes he renders the name of the treatise first, and them its saying. This uniformity is very helpful to readers to grasp the themes.

When listing of views, personalities, cities, or anything, a certain hierarchy should he followed in the names. We should not put the names haphazardly. This technicality had been tremendously followed by Dhikshiga. One cannot but wonder when he lists names, one by one, giving hierarchy, without a single mistake, invoking whom a 'dharpan' is carried out.

1. Brahman
2. Vishnu
3. Rudra
4. Prajapali
5. Vedas
6. Chandas
7. Dovas
8. Rishis
9. Acharyas

10. Gandharvas
11. Sons of Acharyas
12. Samvatsaras
13. Wives of Devas
14. Apsaras
15. Messengers of Devas
16. Naga
17. Parvathar
18. Rivers
19. Human individual
20. Yaksha
21. Rakshasha
22. Pisasar
23. Garuda
24. Denon
25. Animals
26. Trees
27. Plants
28. Four kinds of hootas

Look at the extreme accuracy in arranging the names by merit. The above arrangement itself reveals a truth to us as to who is superior.

Dhikshita's pile of topics is noteworthy. He never places them in a meaningless manner. His method itself clears some doubts in readers. Let us list a few topics as he has kept them to deal with one after another:-

1. Greatness of Gayatri
2. Rules for Japa
3. Sandhya Prakaranan
4. Bring of water to proksha

5. Rules for Homa
6. Time for Homa

Under any topic, Dhikshita plunges immediately into listing others' views without pouring words in the name of introduction . This is a conspicuous point in research methodology. He never writes a word in excess. We cannot pick up a single syllable unnecessarily written.

While ideologies differ, Dhikshita exhibits courage. When he deals with 'Drhma Yagnam', he execrates 'Anathyanathyaya'. He declines even Manu in this regard. This is, indeed, a good model to research scholars of all time.

When problem arises as to whether a separate cooking is necessary for Vaishva Deva in Dharsha Sradda or not, he recounts the two schools; after recounting, he states frankly that 'since separate cooking has been the practice of many this may be adopted'. (P.5467)
Thus he is true to his subject, which tendency is a must in research methods.

Thus, Vaidyanatha Dhikshita had guided us centuries before to do a methodic research

——— • ———

श्रीः

॥ आमुखम् ॥

सुप्रसिद्धेषु व्यासोदितेषु पुराणरत्नेष्वन्यतमं मार्कण्डेयपुराणमिति। पुराणे चास्मिन् अस्माकं जीवनोपयुक्तानि नानाविधानि विषयाणि प्रतिपादितानि विद्यन्ते। तत्रापि "दुष्टशिक्षण शिष्टपरिपालनार्थं स्वीकृत नैजावतारद्वारा सर्वेषां स्थावरजङ्गमानां सुखप्राप्तिदुःखोन्मूलनाय सकलदेवतांशरूपा जगदम्बा भूमौ प्राप्तावतारा सति, चण्डमुण्ड, सुम्भनिसुम्भ, धूम्रलोचन, सुन्दोपसुन्द, प्रभृति राक्षसान् संहृत्य सर्वजाननां तथा देवलोकवासिनां च ब्रह्मविष्णुरुद्रांशभूता सा जगदम्बा अनुग्रह पुरस्सरं धर्मसंस्थापनं कृतवती। तादृश पुराणप्रतिपादकभागस्य देवीमाहात्म्यं, दुर्गासप्तशतीति नैके नामानि। ईदृशमहिमयुक्तदेवीमाहात्म्यस्यानेक व्याख्यानानि सन्ति, तेष्वन्यतमोऽयं चकास्ति (R.2470) गूढार्थदीपिकाख्यं व्याख्यानम्। एतेन व्याख्यानेन देवीमाहात्म्ये विद्यमानानां गूढरूपाणां पदानां अर्थाः सम्यगवगन्तुं शक्यते इति अस्यन्वर्थनाम्ना व्याख्याता नाम चकार। एतादृशं ग्रन्थं मुद्रणं क्रियते चेत् सर्वेषां अत्यन्तमुपकाराय भवतीति अत्र ग्रन्थालये विद्यमान मदीय वरिष्ठविद्वांसः, अस्माकं कार्यनेतारश्च निश्चित्य मां प्रति एतद्ग्रन्थलेखनाय उक्तवन्तः। तदनुसारं लिखितोऽयं ग्रन्थः सर्वेषां उपकारं भवतीति विश्वसामि

इत्थम्

एस्. शेषाद्रिः

॥ देवीचरितव्याख्या-गूढार्थदीपिका ॥

ओं ऋषिरुवाच ॥ १ ॥

मू: सावर्णि: सूर्यतनय: यो मनु: कथ्यतेऽष्टम:।
निशामय तदुत्पत्तिं विस्तराद्गततो मम ॥ २ ॥
महामायानुभावेन यथामन्वन्तराधिप:।
स बभूव महाभाग: सावर्णिस्तनयो रवे: ॥ ३ ॥

सच्चिद्रूपा पराशक्तिस्त्रिगुणानन्तरूपिणी।
जगज्जन्मस्थितिध्वंससाक्षिण्यस्तु शिवाय न:॥
आत्मानन्दबुधा धाम्नो गुरुदुग्धाम्बुधेर्मम।
कटाक्षचिल्लीकल्लोला: क्षालयन्तु मनो मलम्॥
श्रीमद्गुरुपदाम्भोजभावना वासनामयी।
देवीचरितगूढार्थदीपिका प्रोच्यते मया॥

इह खलु, पुरा, शशिमौलिप्रणयान्तेवासी समस्तविशारद: श्रीमार्कण्डेय: परमेश्वरप्रसादलब्धाष्टादशविद्य: क्रोष्टकिनाम्ने स्वशिष्याय ता: समुपदिदेश। प्रसिद्धाश्च का: ह्यष्टादशविद्या:। तथा च श्रूयते -

अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तर:।
पुराणं धर्मशास्त्रं च विद्याह्येताश्चतुर्दश॥
आयुर्वेदो धनुर्वेदो गान्धर्वविद एव च।
अर्थशास्त्रचतुर्थास्ते विद्याह्यष्टादशास्मृता:॥ इति

तत्र पुराणं जायमानस्य तनुभुवनात्मकप्रपञ्चस्य सर्गप्रतिसर्गवंशामन्वन्तर वंशानुचरित पारायण परायणम्। तत्र तत्प्रमेयं सर्गादिपञ्चकम्। यथामूलप्रकृते: परमपुरुषाधिष्ठिताया: प्रथमं महानुत्पद्यते। स तु सकलजगत्कारणभूतो बुद्धिलक्षण:, ततोऽहङ्कार:, सोऽयं। त्रिविध: सात्विकराजसतामसभेदेन। तत्र सात्विकाहङ्कारं मन:, बुध्यहङ्कारचित्तात्मना चतुर्विधमन्त: करणम्, राजसाहङ्कारादुभयविधमिन्द्रियदशकम्, तामसाहङ्कारात् पञ्चतन्मात्ताणि, तेभ्य: शब्दस्पर्शरूपरत्यगन्धेभ्य: क्रमेण आकाशवायुतेजोजलपृथिवीनामधेयानि

शब्दस्पर्शरूपरसगन्धोत्तरगुणानि भूतानि, तस्मादेतानि चतुर्विंशतितत्वानि प्राकृतानि प्रथममुत्पद्यते।

तत्र प्रथमकारणभूतेभ्यो महानयं बुद्धिलक्षणसकलगुणालङ्कृतो माययाहङ्कारादीनात्मतया परिगृह्य स्वयमुपक्रमोपसंहारार्थं हिरण्यगर्भतया जायते। तस्य सिसृक्षोः भगवतोऽन्तःकरणे प्रादुर्भूतो वेदः साङ्गोपाङ्गःसविशेषः। तेनैव परमपुरुषो भगवान् हिरण्यगर्भः चतुर्दशभुवनेषु देव - पितृ - यक्ष - राक्षस - नाग - गन्धर्व - भूत - पिशाच - मनुष्य - पशु - मृग - पक्षि - सरीसृप - स्थावरविशेषाणां जात्यायुर्भोगमवगम्य चतुर्विंशतितत्त्वविशेषैः यथायोग्यमहरहश्चतुर्दशमनून् देवान् सेन्द्रान् सप्तर्षिप्रमुखानन्यानपि सुर नर तिर्यग्देहान् सविशेषान् देशकालकर्मानुगुण मविरतं सृजति। तद्विपरीततया सर्वमिह प्रदर्शितं मूलकारणपर्यन्तमुपसंहरति। तदेव तत्र प्रतिज्ञातम्॥

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम्॥

तत्र सर्गःत्रिविधः, प्रथममध्यमान्तभेदेन। तत्र प्रथमसर्गो मूलप्रकृतेः चतुर्विंशतितत्वप्रादुर्भावः, मध्यमसर्गः तत्वविशेषैश्च तद्दशलोकमनु प्रजावतीन्द्रदेवसप्तर्षिप्रमुखारम्भः अन्त्यसर्गे भूलोके मनुष्य पशु मृग पक्षिसरीसृपस्थावरविशेषाणां प्रतिशरीराम्भः। प्रतिसर्गः प्रदर्शितसर्गस्य त्रिविधस्य प्रतिलोमसर्गः प्रलयः। वंशो ब्रह्मादेः पुत्रपौत्रपरम्परानुगत शरीरसन्तति प्रवाहोऽद्यापि वर्तमानः। मन्वन्तरं ब्रह्मणो दिवसः कल्पः तस्मिन् कल्पे चतुर्दशमनवः द्विसप्तति चतुयुगावृत्ति रेको मनुरिति मनोः मन्वन्तरप्राप्तिकथनम्। लव त्रुटि कला काष्ठा मुहूर्ताहोरात्र पक्षमासर्त्वयनसंवत्सरयुगमन्वन्तर कल्पप्रळयादि कालविशेषोपलक्षणम्। मन्वन्तरं वा वंशानुचरितं, वंशजानां महतामाचारगुणकीर्तनमिति पुराणं पञ्चलक्षणम्। तदेतत्सर्वप्रदर्शनपरं पुराणं शतकोटिप्रविस्तरं ब्रह्मकृतम् तदद्यापि देवलोके वर्तते तत्संक्षेपात चतुर्लक्षप्रमाणेनाष्टादशविधं परम कृपापारावारेण परमर्षिणा पाराशर्येण परिकल्पितम्। तेषां च प्रत्येकं पञ्चलक्षणत्वेऽपि प्रतिवक्तृभेदात् प्रतिवाद

नप्रतिक्रियाभेदार्चनानर्थक्यं सर्गादि नामात्मज्ञानैकशेषत्वादैकार्थप्रतिवादन परत्वात् नशास्त्रभेददोष:।

तत्र भागवते यदिदमत्र सर्गो विसर्गश्चेत्यादिना पुराणानां दशलक्षणत्व मुक्तं, तदनेन विरुध्यते सङ्क्षेपविस्ताराभिप्रायेणैककस्मिन् यथायोग्यं सर्गादीनामन्तर्भावो द्रष्टव्य:। दर्शितञ्चैतद्विष्णुपुराणव्याख्याने। तत्र सर्गादीनामात्मज्ञानशेषत्वं च लक्ष्मीधराचार्यै: श्रीमद्भागवतद्वितीयस्कन्धे व्याख्यानारम्भे सप्रपञ्चं समर्थितम्। तत्रोक्तेषु पुराणेषु मध्ये मार्कण्डेयपुराणाभिधेऽस्मिन् पुराणे सर्गादय: प्रवर्त्तिता:। मन्वन्तर प्रकरणे तु सप्तमन्वन्तराणि प्रपञ्चितानि। एकस्मिन् कल्पे हि चतुर्दशमनव:। कल्पो नाम ब्रह्मणो दिनम्। तत्रास्मिन्वराहाख्ये कल्पे षण्मनवोऽतीता: स्वायम्भुव स्वारोचिषोत्तमतापसरैवतचाक्षुषाख्यां, सांप्रतं सप्तमोमनु:। वैवस्वतो नाम तस्य मत्स्यमूर्तेरनुग्रहात् मन्वन्तरलाभश्च सप्रपञ्चमुपवर्णित:। परं भविष्यत: सावर्णो विष्णुमायाप्रसादतो मन्वन्तरलाभश्चोक्त:। तत्र तस्यक..... वानुग्रहकप्रकार: सप्रपञ्चं विवत्सता क्रोष्टुकिना पृष्टो मार्कण्डेय: तद्विपक्ष: तन्मन:समाधानार्थं तदभिमुखीकरोति: सावर्णि: सूर्यतनय इतिश्लोकद्वयेन। य: अष्टम: मनु: कथ्यते लोके तदुत्पत्तिं निशामय, उत्पत्तिरुद्भवहेतु: कार्येणकारणोपचार:। पूर्वजन्मनि तस्य तत्सेवया तदनुग्रहलाभप्रकार: तन्निशामयेति। अत्र निशामयेति वदता भविष्यन्तमप्यर्थमहं तव करतलामलकवत प्रत्यक्षीकृतमिव वाग्वै........ वेन. करोमीत्यावेदितम्। सावर्णि:सूर्यतनेया इत्युक्त्वानुवाद: सवर्णाभिधानायां सूर्यभार्यायां सूर्याज्जनिष्यत्यसाविति हि पुरस्तादुक्तं. तस्य पूर्वजन्मनि विष्णुमाया सेवानुग्रहप्रकारो न विस्तरेणोक्त:। तमधुना तथा वर्णयामीति भाव:।

अत्रेयमनुसन्धेयम्। इह खलु पुराणत्वष्टृसुतासंज्ञा संज्ञाभार्या सूर्यस्यासीत्। तस्मात्तस्यां समजनि सकलप्रजासंयमनो यमो यमुना चैका कन्यका चैव स्वतोमनुरवि:। एवं संजातपुत्रासती संज्ञा न स्वभर्तृदिहतैक्ष्ण्यमसहमाना तत्परिहाराशंसया तपश्चर्तुमुद्यता पतिव्रताया स्वस्या भर्तृशुश्रूषणमन्तरेण कर्मान्तरेष्वनधिकारमाशङ्क्य तदग्यात्मनैव निर्वोदुमिच्छती योगबलेन स्वच्छायया स्वसमानवर्णां सवर्णां सुवर्णवर्णां काञ्चनवनितां

निर्मायाहं तपश्चर्तुं गमिष्यामि त्वमत्रैव स्थित्वा भर्तारं परिचय, त्वां मामेव मंस्यति भर्ता मद्गमनं त्वया क्वचिदपि न वक्तव्यम्. इति तामुक्त्वा संज्ञा स्वयमुत्तरकुरुषु बडबा सतीतपश्चकार। सा च सवर्णा स्वाभाववेषभूषणादिभि संज्ञा सदृशी स्वरमणमादित्यं रमयती संज्ञेव स्वयं रराम। स च तां संज्ञामेव मन्यमानो रममाणस्तस्यामपि तपतीसंज्ञां कन्यकां शनैश्चरमपिग्रहं सावर्णीसंज्ञमपि मनुं जनयामास इत्यष्टमस्यापि मनोः सममस्यैव तपन एव पिता माता तु सवर्णा, अमुष्यमातृनाम्ना सावर्णिरिति प्रसिद्धिः। अन्यस्य पितृनाम्ना वैवस्वत इति. इयान् विशेषः इति सावर्णिः सूर्यतनय इत्युक्तानुवादोऽयं गुरुणा श्रोत्रसुखसिध्यर्थं क्रियते। विस्तरात् विस्तरेण वर्णयतो मम सकाशादिति शेषः।

तावद्विस्तरेणैव कथयामि यतः, पूर्वं संक्षेपश्रवणे तवालम्भावो नाभवत्। तस्मात् त्वं श्रवणे सावधानो भवेति भावः। श्रवणसावधानतार्थं पुनरप्येतदेव विवृण्वन् प्रतिपाद्यार्थं संक्षेपतो दर्शयन्नाह - महामायानुभावेनेति।

सः अष्मो मनुः महामायानुभावेन महामायानुग्रहेण रवेः तनयः सावर्णिः महाभागो मन्वन्तराधिपैः यथाबभूव तन्तथा निशामयेति पूर्वत्र सम्बन्धः। अयमर्थः - अष्टमो मनुर्यथा पूर्वजन्मनि सुरथो नाम राजा भूत्वा प्रजानां सम्यक् पालनेन संपादितात् सुकृतसञ्चयाद्धेतोः राज्यभ्रंशदुःखानुभवद्वारा सुमेधसोपसङ्गम्य तन्मुखाद्देवीप्रभावमवधार्य तदुपदेशानुसारेण तां समभ्यर्च्य भुक्तिं मुक्तिञ्चावाप. तं तथावधारयेति प्रतिपाद्यार्थसङ्ग्रहः प्रकरणादावनेन कृता. किञ्च अत्र महामायानुभावेनेत्यनेन अत्र प्रकरणे परमप्रतिपाद्यो देवीमाहात्म्यम्. तस्मात् श्रवणे सावधानता कर्तव्येत्यावेदितं महाभाग इति मनुविशेषणेन तस्यात्मशुद्धिरुक्ता। तथा चोक्तम्

आरभ्योत्पत्तिमामृत्योः कलङ्को यस्य नो भवेत्।
स्याच्चैवानुपमाकीर्त्तिः महाभागः स उच्यते॥ इति.

सावर्णिरित्यनेन क्षेत्र शुद्धिः. अयोनिजोदरोद्भवत्वात् आदित्यो हि सकलजगत्कारणभूतः। तथा च श्रूयते - ''सूर्य आत्मा जगतः तस्थुषश्च।'' ''असावादित्यो ब्रह्म''

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः ॥ इत्यादि ॥

तद्बीजोद्भूतत्वात् अस्य बीजशुद्धिः। अनेन विद्याशुद्धिरप्युक्ता "सैषा त्रय्येव विद्या तपति" इत्यादि श्रुतेः तस्य वेदमयत्वप्रसिद्धेः। तदुपदिष्टविद्योसाविति सर्वात्मना शुद्धतरत्वादस्य चरितश्रवणमपि कल्मषापह मितीत्यादरेणैव श्रोतव्यमित्यावेदितम्।

अनयोः श्लोकयोर्द्वयोः अन्योप्यर्थः स्फुरति। अत्र य इत्यावेदनीयम्। तत्रैकत्र यच्छब्दैकवचनं, अन्यत्र य वर्णात् षष्ठ्येकवचनम्. अत्र मनुशब्दो मन्त्रपर्यायः। "मनुर्मन्त्रमिति प्रोक्तं मन्त्रं स्याद्गुमभाषणम्" इति वचनात्। योऽष्टमः योऽमनुः कत्थ्यते तदुत्पत्तिं निशामय यकारस्याष्टमो विकारः तद्वर्णः यो मन्त्रः कथ्यते।

तस्य मन्त्रस्य देवतायाः प्रादुर्भावं शृणु। तन्मन्त्रस्यावयवाक्षरो विशेषणमुखेण विशिनष्टि। सावर्णिः सूर्यतनय इति। सवर्णा माया. "अजामेकां लोहितशुक्लकृष्णामिति" श्रुतेः। अत्रवर्णत्रयेण गुणत्रयं विवक्षितम्। गुणगुणिनोरभेदोपचारात्, सवर्णाया अपत्यं

अपत्यमिव आत्मीयं आत्मनो वाचकमक्षरं. ईकार इति यावत्. तद्वानपि सावर्णिरिति लक्षणयोच्यते। सूर्यतनयः सूर्यस्य तनयः, नेय इत्यस्वप्रकृतिकः स्वांशभूतोऽग्निः, तद्बीजं रेफः। स एव स इति अवयवावयविनोरभेदोपचारः। अत्रानुस्वारः स्वरूपतो निर्दिष्टः। एषामुक्तक्रमेण श्लिष्टोच्चारणे तु ह्रीमिति भुवनेशीसंज्ञो मन्त्रसिद्धो भवति। सावर्णे इतिपाठे सौ अर्णः यस्मिन् मन्त्र इति परोद्धार्यां, तत्र य इत्यस्य नावृत्तिः। सूर्यतनय इति. तद्विशेषणम्. शब्दब्रह्मात्मकस्य सूर्यस्य मुखभूतत्वेन स्निग्धतरत्वादभेदोपचारेण वा मन्त्रान्तराण्यप्यत्रोद्धार्याणि। अतिप्रसङ्गभयान्नोद्धियन्ते। अत्र एवमस्यार्थजातस्य परोक्षवादो युज्यते हि। अस्य ग्रन्थस्य भगवदंशभूतेनार्षिणा प्रणीतत्वात्. पञ्चमवेदत्वाच्च तथाचोक्तं वसुदेवनन्दनेन

परोक्षवादा ऋषयः परोक्षं मम च प्रियम्।
परोक्षवादो वेदोऽयं बालानामनुशासनम् ॥ इति ॥

अमुमेव मन्त्रं भुक्तिमुक्तिफलप्रदत्वेन स्तुवन्नाह - महामायानुभावेनेति ॥ सः मन्त्रः महामायानुभावेन मन्वन्तराधिपो बभूव। मन्त्रान्तराधिको बभूव। तदपि तथा निशामय। तदपि सुरथवैश्योदाहरणेन ते विशदन्दर्शयामीति भावः। महाभाग इति। महाभाग्यहेतुः, रवेस्तनयः सावर्णिरित्युक्तानुवादः। अनेनासौ मन्त्रः सुमेधसोपदिष्ट इति च गम्यते। अधिकारिभेदेन भावना भेदात् फलप्रकार भेदः। तत्र सद्यो मुक्ता उदाहरणम्। वैश्यःक्रममुक्तौ तु सावर्णिरिति विभागः इत्यलमतिप्रसङ्गेन प्रकृतमनुसरामः।

एवं श्रोतव्यसारक थनपूर्वकमभिमुखीकृतायस्वशिव्यायोपदिष्टव्यमुपदिशति गुरुः - स्वारोचिषेन्तरे इत्यादिना॥

स्वारोचिषेऽन्तरे पूर्वं चैत्रवंशसमुद्भवः।
सुरथो नाम राजाभूत्समस्ते क्षितिमण्डले ॥ 4 ॥

हे क्रोष्टुके पूर्वं सुरथोनाम सुरथ इति प्रसिद्धः कश्चित् राजा अभूत्। अत्र नामशब्दः प्रसिद्धेण नामप्राकाश्यसंभाव्य क्रोधोपगम कुत्सन इति वचनात्. पूर्वमित्येतावता कालविशेषो न ज्ञायत इति आह। स्वारोचिषेऽन्तर इति। तत्रास्मिन् कल्पे आद्यो मनुः स्वायंभुवः ब्रह्मपुत्रः। द्वितीयः स्वरोचिषः तस्य काले स्वारोचिषोऽग्निपुत्रः। अस्मिन् मनुपदवीं लब्ध्वा त्रिलोकीं पालयमाने सतीति भावः। तस्य कुलीनत्वमाह - चैत्रवंशसमुद्भव इति। चित्रो नाम राजा स्वारोचिषस्य मनोः पुत्रः तदुक्तं - चित्र किंपुरुषाद्यस्तु मनोः स्वारोषिस्य ते । इति ।

तत्र मनुपुत्रेषु ज्येष्ठत्वाच्छ्रेष्ठत्वाच्च वेदप्रसिद्धोऽसौ "चित्रं इन्द्राजा राजक" इति। तद्वंश्योयमपि तत्सदृशकुलीनत्वशूरत्वादि गुणयोगत्वात्। एतदेव फलतोपिदर्शयन्नाह - समस्ते क्षिति मण्डले इति। अत्रापि राजाभूदिति वाच्यम्। वीर्याधिक्यात् माण्डलिकान्विजित्य चतुःसागरपर्यन्तां मेदिनीं स्वयमेव बभुज इत्यर्थः

तस्यास्य परिपालनसामग्र्यात् राज्यभ्रंशद्वारा विवेक वैराग्यादिद्वारेण सत्यङ्गमात् परमपुरुषार्थलाभं वक्तुमयमारम्भः तस्येति -:

तस्य पालयतः सम्यक् प्रजाः पुत्रानिवौरसान्।
बभूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तथा ॥ 5 ॥

तदा तस्य भूपाः शत्रवो बभूवुः। तस्मिन् काले तस्य सुरथस्य स्वजन्मसिद्धराज्यप्रत्यासन्नः केचिन्माण्डलिकाः शत्रवो बभूवुः। तद्विशेषण मुखेनात्र दृष्टकारणमाह - कोला विद्वेषिण इति। अत्र कोलाविद्वेषिण इति सुरथस्य भूपानाञ्च साधारणं विशेषणम्। तत्र सुरथविशेषणत्वे षष्ठ्येकवचनम्। भूपविशेषणत्वे प्रथमा बहुवचनम्। तथा त्सत्येवं योज्यम्. तत्प्रकारोप्यनुसन्धेयः। कोलाविद्वेषिणस्तस्य सुरथस्य

कोलाविद्वेषिणः केचित् भूपाः शत्रवो बभूवुरिति योजना, कोलशब्दो वराहपर्यायः। ''वराहः सूकरो गृष्टिः कोलः पोत्री किरिः किटिः इति नामानुशासनात्. कोलं

आसमन्तात् तत्र तत्र प्रतिवनं विशेषण इत्यर्थं द्वेष्टुं शीलमस्त्येषां च इति कोलाविद्वेषी कोलाविद्वेषिणः। तथाविधस्य तस्य तथाविधास्ते शत्रवो बभूवुः। अयमत्र प्रकार ऊह्यः।

इह किल कदाचित् मृगयारसिकः सुरथाख्यो वसुमतीवल्लभः स्वप्रतापमात्रवशीकृतसमस्तमाण्डिकमण्डलोविशङ्कित मनश्चापदेभ्यः प्रजाः पालयन् कर्तव्यान्तराभावात् करदण्डाग्रकलितकोदण्डबाणः स्वयमेवाटव्यामटन् कञ्चन किरि कठोराग्रेण शरेण निजघान। तदनु, सरभसं प्राणपरीप्सया वनान्तरमुत्पतन्मृगयारसिके तरमाण्डिकमण्डल परिबन्धजालजालान्तरमुदपतत्। तदनु च ते तं सरभसमेत्य शूलप्रासासितोमरैः निहन्युः।

अथ स नरपतिः मच्छरविद्धोमदनुयातोयं वराहो मदीय एवेति तान् प्रत्यभिससार। ते चास्मज्जालजाल मापतितोस्मच्छस्त्रनिर्भिन्नोऽस्मदीय एवेति प्रत्यवतस्थिरे। इत्येवमेव तद्द्रव्यविवादात् तत्र शत्रवो बभूवुरिति। ननु तर्हि स्वविहितस्य परिपालनस्याकरणान्तस्य शत्रव आसन् नेत्याह - पालयत इति ॥ क्षत्रियः परिपालयेदिति वचनात्।

2

धर्मं चार्थञ्च कामञ्च यद्यत्प्रामुं समीहिते।
तत्तदाप्नोति यत्नेन प्रजा धर्मेण पालयन् ॥ इति वचनाच्च॥

राज्यवासिनो नगरवासिनः ब्राह्मणक्षत्रियवैश्यशूद्रानन्याननुलोमजान् प्रतिलोमजांस्तु स्वाधिकारे स्थाप्य पक्षपातशून्यः शास्त्रोक्तप्रकारेण ररक्षेत्युक्तम्. सम्यगित्यनेन। तत्रापि च स्नेहवैषम्याभावयोः प्रकाशनाये दमुदाहरणम्। औरसान् पुत्रानिवेति। दत्तक्षेत्रजादयो बहुविधाः पुत्राः, तत्रौरसः श्रेयान्. बुद्धिरूपलक्षणसंपन्नां समानकुलशीलकन्यकां अग्निसाक्षिकं यथाविधिपरिगृह्य ऋतुकाले तस्यां यथाविध्युत्पातितः पुत्रः औरसः। स खलु पित्रोरिहामुत्र च निश्रेयसकारी. तथा च श्रूयते -

संस्कृतायां सवर्णायां पुत्रमुत्पादेद्धियम्।
तमौरसं विजानीयात् पुत्रं प्रथमकल्पितमिति॥

तादृशान् पुत्रान् यथा जनकः पक्षपातं विहाय सस्नेहं रक्षेत् तथायं प्रजा ररक्षेति। तर्ह्यत्र तथाविधस्य तस्य शत्रुसद्भावे को हेतुरिति, तत्राह - सम्यक् पालयत इति। श्रीनारायणप्रसादमात्र फलोद्देशेन स्वधर्ममाचरत इति।

अयंभाव :- एवं स्वप्रीतिमात्रप्रयोजनं स्वधर्म मनुतिष्ठतो राज्ञः परितुष्टो भगवान् कमलावल्लभो भक्तजनाह्लादकारी करुणाम्बुधिरचिन्तयत्। अयं खलु मय्यतीव भक्तः एवमेवैतदैश्वर्यमनुभवन् कदाचिन्मामननुस्मृत्य मदान्धः पतेत. तदेतदेवमस्य माभूदिति विचिन्त्य झटिति क्षुद्रतरैः परिभवमुत्पाद्य विवेकं वैराग्यञ्चोत्पाद्य आत्मशक्त्यां महामायायां भक्तिं सत्सङ्गादुद्भाव्यतया त्रैलोक्यराज्याधिपत्यभाजं कारयित्वा अमुं संसारान्मोक्षयिष्यामीति लक्ष्मीकान्तकृपयैव तस्य शत्रवो बभूवुरिति।

तस्य तैरभवद्युद्धमतिप्रबलदण्डिनः।
न्यूनैरपि सतैर्युद्धे कोलाविध्वंसिभिर्जितः॥ ६ ॥

तस्य तैर्युद्धमभवत्॥

वाग्दण्डयोश्च पारुष्यमर्थदूषणमेव च।

पानं स्त्री मृगया द्यूतं व्यसनानि महीपतेः॥

इति नयशास्त्र प्रसिद्धया

महीपतिव्यसनभूतेषु वाक्पारुष्यादिष्वन्यतमे मृगयाव्यसनसागरे निमग्नस्य स्वमार्गणपरिक्षुण्णपरजालोत्पतितनिहतवराहविवादेन परिपन्थीकृत माण्डलिकस्य सुरथस्य तैर्विवादमूर्च्छनायामेकस्य बहुभि रुद्यतशस्त्रस्य क्रोधादुद्यतायुधैः प्रहरणमभूत्। शस्त्रिणां खलु स्वभावोऽयं। विवादमूर्च्छनायां स्वायुधमुद्यम्य प्रहरेयुरिति। अतिप्रबल शत्रुभिः। तदानीं तेषां दैववैमुख्यात् प्राबल्यमासीदिति भावः। न्यूनैरपि। स्वतो न्यूनैरपि, बलेन कोशेन जन्मनाऽस्त्रशस्त्रयुक्त्या बाहुवीर्येणातितुच्छैरपि दैववैमुख्याद्युद्धे स जित इति।

(मू) ततःस्वपुरमायातो निजदेशाधिवोऽभवत्।
आक्रान्तःस महाभागः तैस्तदा प्रबलारिभिः ॥ 7

ततः स्वपुरमायातः पराजयानन्तरं स्वपुरमायातः। एवं युद्धे पराजितः सुरथोऽचिन्तयत्। इदानीं मम को धर्मः। "पलायनाद्वधः श्रेयान्" इति वचनात्, एतैर्विगृह्य युद्धे मरणमेव श्रेय इति प्रत्यभात्। तेषु खलु हीनतरा बहवो युद्धधर्मानभिज्ञाः अहमेकाकी दुर्बलः पराजयखिन्नः। तस्मात् भूयोऽपि मया युद्धेमरणेच्छया तदुद्योगे क्रियमाणे माममी न निहन्युः। किन्तु मां बद्ध्वा निन्युरेव. तस्मात् पलायनमेव श्रेयः। "बन्धप्राप्तौ पलायनं" इतिवचनात्।

"आत्मा हि सर्वथा रक्ष्यः दारैरपि धनैरपि"। "जीवन्भद्राणि पश्यति"। इत्यादि वचनाच्च पलायनमेव श्रेयोनिश्चित्य, पश्चात् मन्त्रिबलाद्ध्यक्षादिभिः सम्मन्त्र्य परिभवप्रतिक्रियां करिष्यामीति निश्चित्य सत्वरं स्वपुरमगमत्॥ निजदेशाधिपोऽभवत्। एवं पराजितो गृहमागतः सन् मन्त्रिणो बलाध्यक्षांश्चाहूय परिभवकर्तृन् प्रतिबलोद्योगं नियोजयामास। तदानीं ते तन्नियोगं न कृतवन्तः। अशक्तोयमिति मत्वा तद्द्रव्यापहरणेच्छया इति पराधीनप्रकृतिवर्गोपिस्वत्ववासनाबलात्कतिचिद्दिनानि स्वजन्मसिद्धराज्यमात्रस्वामित्वभावनामनोरथोऽभवत्। आक्रान्ताभूरिति॥ हे

महाभाग, क्रोष्टके अवधारय सुरथस्य दुरवस्थां। तदा तैः स्वराष्ट्रनिकटवर्तिभिः। पूर्ववैरिभिः छिद्रान्वेषिभिरस्य दौर्बल्यमवधार्य स्वस्वमण्डलनिकट वर्त्तितदीयराज्यैकदेशोऽपहृतः। इति निजदेशलक्षणभूरपि कात्स्न्येनापहृता। एवमवहृतराज्यःसन् कतिचिद्दिनानि स्वपुरमात्रस्वामित्वभावनामनोरथोऽवसत्।

आपदापदमनुबध्नाति अनर्थाः सञ्चारिणः।
एतत्तस्मिन् विशदमासीत्'' इति भावेनाह स्वामात्यैः

(मू) अमात्यैः बलिभिर्दुष्टैः दुर्बलस्य दुरात्मभिः।
कोशो बलञ्चापहृतं तत्रापि स्वपुरे सतः॥ ८

तत्र स्वपुरे, सतो वसतः पश्यतोपि कोशः अगरत्यञ्चितो द्रव्यसञ्चयः। अपहृतः तस्यामात्याः तदानीं तद्दौर्बल्यमवधार्य

''आपदर्थं धनं रक्षेत्'' इति वचनात्। आपद्धनाहि कोश सञ्चयः। तदयमधुनोद्धृत्य विनियुज्य बलाद्ध्यक्षान् स्ववशे कृत्वा, आत्मकृच्छ्राणि निर्मुच्येतायमिति विचिन्त्य, ततः, पूर्वमेव कोशागारगतं धनं तैरुद्धृत्य विभज्यापहृतम्। एवमपहृतधनसञ्चयः सन् भग्नमनोरथः स्ववामतो दक्षिणतश्च सादरमविच्छेदेन कृतभोजनान् वीरभटान् स्वद्रव्यस्वीकारसाहाय्यायायं पश्येदिति मन्वानैः ततः पूर्वमेव तैर्बलञ्चापहृतम्। बलाध्यक्षानुत्कोचदानेनवशीकृत्य बलस्य मतिभेदं कृतवन्तः इति बलञ्चापहृतम्।

ननु धर्मशीलस्यामात्याः खलु ते धर्मज्ञा एव। ''सुभृतेनामृतेः कार्या भर्तृपिण्डप्रतिक्रिया'' इत्यादि वचनज्ञाः। तत्कथं तथा कृतवन्तः इत्याशङ्कायां दैवमुख्यात् स्वाभावभेदस्तदानीमासीदित्याह - दुरात्मभिः। न मनस्येव तेषां दौष्ट्यमासीत् कर्मण्यपीत्याह - दुष्टैरिति॥

अमात्यराष्ट्रदुर्गाणि कोशो दण्डश्च पञ्चमः॥
इति प्रकृतयस्तज्ज्ञैः विजिगीषोरुदाहृताः॥

इति वचनात् विजिगीषोस्तस्य पूर्ववत्सहायभाजोपि दैववैमुख्यात्तदानीं कार्पण्यदोषदूषिताः विस्मितोपकाराः तद्द्रव्यापहरणकृतमतयो जुगुप्सिततदपहरणं कृतवन्तः। तत्सौकर्यदर्शनार्थं दुर्बलस्येति विशेषणं ईश्वरापकृष्ट शौर्यसत्यत्सहायस्य, किञ्च, बलिभिः ऐकमत्यात् स्वाधीनकोशबलाध्यक्षतया चानायासेन तत्कर्तुं समर्थैरिति भावः। किन्तहर्येतस्मिन् विदेशं गतवति धनापहरणं कृतवन्तः इति, नेत्याह - तत्र स्वपुरे सत इति तस्य पश्यत एव तृणीकृत्यापहृतवन्तः इति भावः। तत्रापि स्वपुरे सत इत्युक्तम्। तत्र अपिशब्दः शङ्कायां वर्तते।

तदानीं अमात्यान् प्रति राज्ञ इयमाशङ्का समजनि। इमेऽमात्यादयः मयि पश्यतेव मां तृणीकृत्य मत्कोशमपहृतवन्तः, ततः कार्पण्यादितः परं मामपि निगृह्णीयुरेव। ततो मया त्वरितं गन्तव्य मेव। किञ्चापन्नस्य ममेदानीं सज्जनसेवायोग्यश्चायं कायः। तस्मात्सज्जनसेवार्थं मया वनाय गन्तव्यं. तत्राञ्जसा गमने क्रियमाणे मय्येषामीदृशी शङ्कास्यात्, अयं देशान्तराणि प्राप्य कालान्तरेर्थपुरुषकारनयसामग्रीमापाद्यास्मान् मूलंछिन्द्यात् तदस्माकं महानपनयः स्यात्॥

ऋणशेषं अग्निशेषं शत्रुशेषं न शेषयेत्।

इति वचनात्. तस्मादेतान्कार्यापदेशान्वञ्चयित्वा मयाऽमुष्मादेशात् गन्तव्यमित्यध्यवस्य तदुपक्रान्तवानित्युपपादयति - तत इति॥

ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः।
एकाकी हयमारुह्य जगाम गहनं वनम् ॥ ९ ॥

ततः स भूपतिः मृगयाव्याजेन वनं जगाम। अनन्तरं राजा सुरथो मृगयाच्छलेन तपोवनं जगाम। नन्वनृतवचनमयुक्तं, तस्य भूपतेः नानृतं वदेत्'

स्वर्गापवर्गसिध्यर्थं सत्यमेव वदेन्नरः।
सत्यवाक् स्वर्गमाप्नोति सत्ये ब्रह्म प्रतिष्ठितम्॥

इत्याद वाक्यवित् स कथं तं तथाकृतवानिति शङ्कामुच्छिनत्ति। स भूपतिरिति॥ प्राणसङ्कटं प्राम: सूक्ष्मदर्शी।

स्त्रीषु धर्मे विवाहे च वृत्त्यर्थे प्राणसंकटे।
गोब्राह्मणहितार्थाय नानृतं स्याज्जुगुप्सितम् ॥ इति

अनृतं नानृतं स्त्रीषु परिहासविवाहयो:।
आत्मत्राणार्थघातेषु तदेवोत्तमतां व्रजेत्॥

इत्यादिवचनादुक्तविषयेऽनुवचने दोषाभावं गुणोदयञ्च शास्त्रनिपुण्या बुद्ध्याऽद्ध्यवस्य कृतत्वान्नायन्दोष इति भाव:। हृतस्वाम्य इति। तदानीन्तस्य कृच्छ्रगतत्वेन तत्कर्तुं योग्यत्वानुस्मरणार्थमनुद्यते - हयमारुह्येति॥

मृगयार्थमेवास्यायमुद्योग: इति तत्रत्यानां प्रतीति: स्यादिति। अन्यच्च हयमारुह्य गच्छत: पुन: शीघ्रं प्रत्याममनं सिद्ध्यती त्यभिप्रायेण तं तथाकृतं गहनवनप्रवेशं; मुनीनां विविक्तवासशीलत्वात् तादृशेषु वनेषु तेषामाश्रम: सम्भवतीति चिन्तया।

एवं सुरथस्य आपत्कालो गत: संपत्काल: संग्राम इति वक्तुं उपक्रमते - स इति।

स तत्राश्रममद्राक्षीत् द्विजवर्यस्य मेधस:।
प्रशान्तश्वापदाकीर्णं मुनिशिष्योपशोभितम्॥ १० ॥

हे द्विजवर्य! तत्वजिज्ञासया मच्छुश्रूषया च मच्छिष्यप्रवर: स: सत्सङ्गमकाम: सुरथ: तत्र वने आश्रमं कञ्चन तापसावासमद्राक्षीत् ददर्श। न च तदिदं यस्य कस्यापि साधारण्यस्य मनेराश्रमं, किन्तु सुमेधस: विद्यया तपसा च प्रसिद्धस्य सुमेधस: आश्रमं. यद्वा द्विजवर्यसुमेधस: तपोविद्यादिभि: गुणै: वरिष्ठतां प्रामस्य, सुमेधस्य द्विजवर्येति संबोधनपक्षे गुरुणा स्निग्धतरत्वादसौ तथा संबोध्यते। तत्र तदाश्रमं पश्यता तेन तस्यमुने: तपोविद्यावैशिष्ट्यातिशयेनास्य मुनिवैलक्षण्यं लक्षयता तत्सेस्वायां स्वाभिमतसिद्धिमनुमानेनाध्यवस्य समाश्वस्तमित्याश्रमविशेषमुखेन व्यञ्जयन्नाह

- प्रशान्तश्वापदाकीर्णं मुनिशिष्योपशोभितमिति॥ तत्र प्रशान्तश्वापदाकीर्णमिति विशेषणेन स्वभावतोऽतिभयङ्करभावव्यापाराकृतीनामन्योन्यहिंस्राणामपि सिंह व्याघ्रशरभादीनां मुनिवरसान्निध्यमात्रेण सौम्यस्वभावमापन्ना नामितरेतरानुरा गाद्रीकृतमानसानां मिथ: कण्डूयनघर्षणलेहनादि विनोदनमुदितमानसानां जालैस्तदाश्रमस्याकीर्णतामालोकयता तदीयतप: प्रभावानुमानेन तद्वारा स्वकीयरक्षाप्यध्यवसिता इति व्यञ्जितम्। मुनिशिष्योपशोभितमिति विशेषणेन पुन: तच्छिष्यप्रशिष्याणां यथायोग्यं गुरुशिष्यभावमापन्नानां तत्र तत्र विविक्तशरणेषु नानाविध शास्त्रव्याख्यानवाचनध्वनिना हृद्यतरतां पश्यता सारासारविवेचनं मुनेरनुमीय तत्सेवया स्वस्य आपद्विमुक्त्यध्यवसायोऽपि कृत: इति व्यञ्जितम्।

एवं भूतमाश्रमं दृष्ट्वा, अत्र प्रविश्य मुनिवरमुपास्य कृतार्थीभविष्या मीत्यध्यस्य मुनिभक्त्याध्यस्य मुनिभक्त्याऽश्वादवरुह्य तत्र प्रविवेश च इत्युत्तरवाक्यार्थवशात्सिद्ध्यति।

तस्थौ कंचित्स कालं च मुनिना तेन सत्कृत:।
इतश्चेतश्च विचरन् तस्मिन्मुनिवराश्रमे। ११

स तु तेन मुनिना सत्कृत: तस्मिन् मुनिवराश्रमे कञ्चित्कालं तस्थौ। मुनिदिदृक्षया तत्र प्रविशन्नेव स सहसा कृत्यान्तरेऽग्निशरणात् बहिरागतेन तेन दृष्ट:। तत्कालसदृशं सूनृतवचनादिना कृतसत्कार: इत्यशेषकरणाय तस्मिन् अन्तर्गतवति सति तदवसरं प्रतीक्षन्मम प्रवेशसमय एव मुनेर्दर्शनं कार्यसिद्धये भविष्यतीति प्रसन्नचित्त: तदवसरं प्रतीक्षन्नाश्रमशोभामाश्चर्यभूतान् मृगांच पश्यन्नितश्चतेतश्च पर्यटन् कंचित्कालं तस्थौ। स तदा तत्राचिन्तयत्।

एवमाश्चर्यवस्तुनि वीक्ष्य पर्यटंस्तानि प्रायेणदृष्ट्वा क्वचित् कस्यचिन्निबिडतरुच्छायस्य वृक्षस्य मूले स्थित्वा चिन्तयामास। कस्मात् किं विषयेयं चिन्तेत्याशङ्कायां तद्विशेषण मुखेन विषयं हेतुञ्चाह - अनुभूते वस्तुनि परवशेपि स्वत्वाभिमानं ममत्वं, तेन परवशीकृतमानस: पूर्वानुभूतानि वस्तून्युदिश्यापायानशङ्कत। अपायदर्शी स्नेह इति प्रसिद्धम्।

।चिन्ताप्रकारमाह - मत्पूर्वैरित्यादिना श्लोकपञ्चकेन।

सोऽचिन्तयत्तदा तत्र ममत्वाकृष्टचेतनः।
मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत्॥

मद्भृत्यैस्तैरसद्वृत्तैः धर्मनः पाल्यते न वा।
न जाने स प्रधानो मे शूरहस्ती सदामदः॥
मम वैरिवशं यातः कान् भोगानुपलप्स्यते।
ये ममानुगता नित्यं प्रसादधनभोजनैः॥
अनुवृत्तिं ध्रुवं तेऽद्य कुर्वन्त्यन्यमहीभृताम्।
असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययम्॥
संचितः सोऽतिदुःखेन क्षयं कोशो गमिष्यति।
एतच्चान्यच्च सततं चिन्तयामास पार्थिवः॥ २६ ॥

तत्र तावत् स्वराजधानीं प्रत्यपायमाशङ्कते। ममत्व विषयाणां वस्तूनां तदाधारत्वादिदानीं मम तत्पुरं मद्भृत्यैः धर्मतः पाल्यते वा, पुनः संहतैः बहुभिः तत्संरक्षणीयमेव, न वा, तैर्धर्मतो न पाल्यते किम्. इदानीं ममात्यादिभिर्धर्म शास्त्रानुसारेण तत्पुरं रक्ष्यते किं, धर्मतो रक्षणे अवकाशोस्ति।

पूर्वं मम्पूर्वैः पालितं यत्पुनः पितृमरणानन्तरं मयाप्येतावन्तं कालं धर्मतः पालितं संप्रति मया हिनं तस्माद्राज्ञो विवासान्नगरं नष्टमिति लोकापख्यातिभयेन ते धर्मतो रक्षेयुरेव।

किञ्च, मद्भृत्यैः शैशव एव मत्परिचयेन धर्मतः पालने विशारदा हि ते। अपि च, तैर्बहवो हि ते पूर्वं मयाप्येकेनैव रक्षितं तस्याप्यवकाशे सति असद्वृत्तैः परमापदमापन्ने मयि कृतोपकारं माममनुस्मृत्य कृतद्वेषैः. तस्माद्धर्मिविरोधित्वात्ते तद्धर्मतो न रक्षेयुः। किञ्च, मत्पूर्वैः पालितं एतावन्तं कालं मयापि पालितं, न मन्त्र्यादिभिः, ते साहाय्यमात्रभाज एवासन्. तस्मादस्मदधीनैव तद्रक्षा. तस्मादिदानीं मयि प्रवसिते ते धर्मतो न रक्षेयुः। किञ्च, मद्भृत्यैः मत्संबन्धात्ते च संप्रति निर्भाग्या एव। अतस्तथा संप्रति न रक्षणीयम्। किञ्च, तैः प्रत्येकं मत्सरग्रस्तैः एवं नगरी विषयाञ्चिन्तां

सन्तापकारिणीमभि धाय तामेव साम्राज्याभिषेक समनन्तरं सभार्यस्य नगरप्रदक्षिणार्थं उपकल्पितैरावतकुलप्रसूतकरीन्द्र गोचराञ्चिन्तां प्रदर्शयति - गजानामिति।

यो मे हस्तिपकान् कीदृशान् भोगानुपलप्स्यते। इत: पूर्वं मत्तोऽभीप्सित भोगभोगी स:, संप्रति मद्विहीन: किमभीप्सितानभीप्सितान् भोगाननुभवति। उभयत्राप्यवकाशोस्ति। गजानां प्रधान:। ऐरावतकुलोद्भवत्वात् सर्वजनादरणी यत्वात् विशिष्टभोगलाभावकाश:। शूर: शूरत्वात् रणनिर्भयत्वात् विजयकरत्वाच्चेति यावत्। सदामद: श्रीकरत्वाच्च मदजलसिक्तकरिकपोल निवासिनी हि लक्ष्मीरिति प्रसिद्धि:। अत: तादृशस्य श्रीकरत्वमुपपद्यते। मम हस्ती मम वैरिवशं यात: इति विशिष्ट भोगालाभेप्यवकाश:। स्वामिनि मय्यतीव भक्त:। मद्वियोगात् संप्रति विद्येतासौ ततस्तद्दर्शनान्मच्छत्रव स्तन्नाद्रियेरन्।

अथ भावानुसारिण: स्मरन्ति ये मां प्रसादधनभोजनै: नित्यमनुगता: तेऽद्यान्यमहीभुजामनुवृत्तिं कुर्वन्ति ध्रुवम्। त्रिविधा: खलु मे सेवका:, उत्तम मध्यमाधमभेदात्। प्रसादमात्रकामा उत्तमा:। धनकामा मध्यमा:। भोजनकामा अधमा:। एवं त्रिविधास्ते सेवका:। अद्य इतरराजकुलसेवां कुर्वन्ति, अहो महद्दु:खमेतन्मम। यद्वा प्रसादार्थिन: क्षत्रिया:, धनार्थिनो वैश्या:। मृष्टभोजनार्थिनो ब्राह्मणा:। प्रसादधन

भोजनार्थिन:शूद्रा:। तेषान्नियतकर्मकरणेन परिकल्पितकजीवितोप जीवित्वात्. ये चातुर्वर्णिकास्ते बताद्य इतरराजकुलमुपजीवन्तीति। अत: परमनुस्मरति - मम भार्येत्यादिना. संप्रति मम भार्या कुशलिनी किन्तु। परिव्रताया: संप्रति पातिव्रत्यं न भज्यते. किं न वा. कुत्रोभय स्याप्यवकाशोस्ति। वरारोहा उत्तरकायार्द्धमराह:। सर्वांगसौन्दर्ययुक्तेति यावत्. तस्मात् कामुकानान्तस्यामभिलाषावकाश:। तदसंभवेप्ययमेव हेतु:। वारारोहां उत्तमाङ्गानां पातिव्रत्यानपायलक्षणयुक्ताम्। संप्रति ममपुत्रश्च कथं वर्तते. किं कुशली. कुशले चावकाशोऽस्ति अतीव शोभन इति। कुशलं प्रतिभाति। मम भाग्यहीनस्य पुत्र: इत्यकुशलमेवास्य संप्रतिइति च प्रतिभाति। पूर्वत्रापि

मम भार्येत्ययमेव वा पातिव्रत्यभङ्गावकाशहेतुः। मम सद्मानि संप्रति कथं वर्तते। क्रीडामन्दिरानि मदीयानि तानि संप्रति सुरक्षितान्यरक्षितानि वा। तत्रोभयत्राप्यवकाशः स्वर्गसदृशानि अतस्तत्रत्याः तानि रक्षेयुः, अथवा तान्यरक्षितानि वा। अमात्यदीनां भिन्नमतित्वेन तत्पालनौदासीन्ये तेषां हृद्यतरत्वे च सर्वजनानां स्वातन्त्र्येण तत्प्रवेशादि सौकर्यादतिलोभनीयचित्र पुत्रिकादिपरिक्षयः संभाव्यत। अप्सरः प्रतिमा स्त्रिय इति। स्त्रियः वारमुख्याः संप्रति किं कुशलिन्यः किमकुशलिन्यः तदुभयमपि संभवति. इति शङ्काहेतुः। अप्सरः प्रतिमा इत्येतदेव अप्सरसस्स्वर्वेश्या उर्वश्याद्याः ता इवातिरमणीयवेषविभ्रमाः खल्वेताः। तस्मात्सर्वेषां तास्वनुरागसंभवात् तासां कुशलमेवेति प्रतिभाति। अनुरागेपि रागिणां मतिवैषम्यादपथप्रवृत्तस्य शास्तुरभावादेवाकुशलमेवेति प्रतिभाति। अथामात्याधीनं स्वद्रव्यसञ्चयं प्रत्यनुस्मरति - असम्यगिति॥ तैः कोशः क्षयं गमिष्यति। अत्र हेतौ तृतीया। अमात्यैः व्ययीकृतत्वात् अस्मद्धनसञ्चयः क्षयं गमिष्यति। ते कीदृशाः इत्याह। असम्यग्व्ययशीलेः इति॥

धर्माय यशसेऽर्थाय कामाय स्वजनाय च।
पञ्चधा विभजन्वित्तमिह प्रेत्य च मोदते।

इति शास्त्रविहितः सम्यग्व्ययः। एते न तच्छीलाः। किन्तु असम्यग्ययशीलैः असम्यक्त्वञ्च स्रक्चन्दनवनितादयो विषयाः। तदनुभवार्थं व्ययं कुर्वद्भिः किञ्च सततं व्ययं कुर्वद्भिः द्विविधाःखलु जनाः आयशीलाः व्ययशीलाः आयव्ययौ विमृश्य तदनुसारेण व्ययंकुर्वाणाश्चेति। एते खलु सदालब्धं धनं विषयभोगार्थमेवोपभोगशीलाः। किञ्च, सोऽतिदुःखेन सञ्चितः मत्पूर्वजैः मया च परराष्ट्रविमर्दनादिना परमदुष्करेण कर्मणा यथाविधिसंपादिता खलु तद्धनं तत्खल्विदानीं तैरात्मसात्कृतम्. अतस्तदार्जनायासमजानद्भिः तैः हेतुभिरचिरेण तत्क्षयावकाश इति भावः। अपि च तैर्बहुभिः महदपि धनं बहुभिर्नैरन्तर्येणोव भुज्यमानमेव क्षीयेतेति प्रसिद्धम्।

भक्ष्यमाणोभ्यनावापः क्षीयते हिमवानपि "इतिहि श्रूयते। इवं चिन्तयतः सुरथस्य तुल्यदुःखेन केनचिद्वैश्येन सख्यमभूदिति प्रतिपादयितुं उपक्रमते

- एतदित्यादिना॥ एतच्च अत्रोपन्यस्तं पुरादिवारवधूपर्यन्तं वस्तु, अन्यच्च अनुपन्यस्तं छत्रचामरादिलक्षणं वस्तु च अनवरतचिन्तया न:स पार्थिव:।

तत्र विप्राश्रमाभ्याशे सैश्यमे कं ददर्श स:।
स पृष्टस्तेन कस्त्वं भो हेतुश्चागमनेऽत्र क:॥ 17 ॥

सशोक इव कस्मात् त्वं दर्मन्य इव लक्ष्यसे।
इत्याकर्ण्य वचस्तस्य भूपते: प्रणयोदितम्॥ 18 ॥
प्रत्युवाच स तं वैश्य: प्रश्रयावनतो नृपम्॥ 19 ॥

तत्र विप्राश्माभ्याशे स्वदृष्टिगोचरेऽध्वनि मुनिवराश्रमान्तिके एकं कञ्चन असहायं च वैश्यं ददर्श॥ अत्र अन्यच्च स्वपार्थिव इति पदद्वयेन तस्य चिन्तनीयानि

वस्तून्यसंख्येयानि इति न वर्णनीयानि। तस्य ग स्तमेदिनीनायकत्वात् इति द्योतितम्। किञ्च स तं पृष्टवांश्चेत्याह - स इति॥ स वैश्य: तेन सुरथेन पृष्ट:। कथमित्याह - कस्त्वं भो: इति। भो इति संबोधने। तात, कस्त्वं ब्राह्मणो वा क्षत्रियो वा वैश्योवा, तेषामन्यतमोऽसि यतस्त्वं, उपवीती तेजस्वी च। किञ्च, ते नाम अत्र दुष्प्रवेशोऽस्मिन् वने आगमने च को हेतु:। त्वं सशोक इव लक्ष्यसे त्वं दु:खयुक्तइव मे स्फुरति। तत् कुत: दुर्मना इव, तत्तव दौर्मनस्यस्फुरणात् कल्पितम्। त्वां पश्यतो मम मुखवैवर्ण्यलोचनगलान्यादिना व्यभिचारिलिङ्गेन दौर्मनस्यमवधार्य तेन दु:खेन सद्भावो निश्चित:। कस्मात् तत्कस्मात् तत्कारणं किमित्यर्थ:। दु:खे सति देहग्लानि: संभवति। चक्षुश्चाभ्यन्तर भावव्यञ्जकम् इति हि श्रूयते।

मन:शरीरयो: ताप: परस्परमनुव्रजेत्।
आधाराधेयभावेन तप्ताज्यघटयोरिव ॥ इति
सर्वे भावा: चक्षुषि व्यज्यन्ते। इति च

यद्वा, त्वं सशोक इव मे भाति। तत्कुत:, दुर्मना इव दौर्मनस्य प्रतिभावात्, कस्मात्तदेतदेव मम स्फुरणं कुत:। परमार्थत: तव दौर्मनस्यकृतदु:खस्य सद्भावात्, तव प्रकृतिरीदृशीवा न चेत् तत्कारणं किमिति ब्रूहि। स वैश्यस्तस्य

वच इत्याकर्ण्य तं प्रत्युवाच। एवं राज्ञा पृष्टो वैश्यः राज्ञे तदुत्तरमब्रवीत् कथमब्रवीत्। प्रश्रयावनतः प्रश्रयः शास्त्रश्रवणसंस्कारजं मनसः प्रावण्यं, तेनावनतः। बाह्यकरणप्रावण्ययुक्तः। एवं करणे हेतुः अनेनासौ सुरथो राजा ज्ञात इति। एतत्प्रतिपादयितुं भूपतेः प्रणयोदितमिति तद्विशेषणं, पृच्छन्तममुं दृष्ट्वा पूर्वदर्शनसंस्कारवशात् शरीरलक्षणान्याकलय्य राजा सुरथोयमिति शङ्कमानः तद्वाङ्माधुर्येण निश्चित्य राजानं पूजयन् प्रश्रयावनतोऽब्रवीत् इति वचसः प्रणयोदितत्वमनुरागमुदितत्वं, राज्ञां हि वचनमनुरागमुदित त्वान्मधुरतरं हि॥ सुरथस्य विशेषतोऽतितरं मधुरं क्षत्रियस्य वाङ्माधुर्यं प्रसिद्धम्। तथा च श्रूयते

नवनीतं हृदयं ब्राह्मणस्य वाचि
क्षुरो निहितः तीक्ष्णधारः,
विपरीतंमुभयं क्षत्रियस्य वाङ्नवतीतं
हृदयं तीक्ष्णधारमिति॥

वैश्य उवाच ॥ २० ॥

समाधिर्नाम वैश्योऽहमुत्पन्नो धनिनां कुले॥ २१ ॥
पुत्रदारैः निरस्तश्च धनलोभादसाधुभिः।
विहीनः स्वजनैर्दारैः पुत्रैरादाय मे धनम्॥ २२ ॥
वनमभ्यागतो दुःखी निरस्तश्चाप्तबन्धुभिः।
सोऽहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकाम् ॥ २३ ॥
प्रवृत्तिं स्वजनानां च दाराणां चात्र संस्थितः।
किं नु तेषां गृहे क्षेममक्षेमं किं नु सांप्रतम्॥ २४ ॥
कथं ते किन्नु सद्वृत्ताः दुर्वृत्ताः किन्नु मे सुताः॥ २५ ॥

एवं पृष्टो वैश्यस्तावत् कस्त्वमिति प्रश्नस्योत्तरमाह - अहं वैश्यः, न ब्राह्मणः, क्षत्रियो वा, समाधिर्नाम; नाम्ना समाधिरिति प्रसिद्धोऽहम्। नमां कश्चिदपि न जानाति। अत्र हेतुः धनिनां कुले उत्पन्न इति। ममायमर्थोप्यनर्थः संवृत्त इति वदन् हेतुश्चागमनेऽत्र इति प्रश्नस्योत्तरमाह।

पुत्रदारैरिति चशब्दो गृहीत इत्यत्र व्यवहित तथा सम्बद्ध्यते। अहं पुत्रदारैः निरस्तः उपेक्षितः। ननु तर्हि तत्किं केनचिद्दोषेण दूषितत्वादिति - नेत्याह धनलोभादिति। अर्थकार्पण्यात् तर्हि लुब्देन त्वया वृत्तिविरोधात् अर्थलोभस्तेषामासीदिति चेत् नहि नहीत्याह असा धुभिरिति। तेषां दौष्ट्यमेवात्रकारणं। किञ्च न केवलं उपेक्षित एव स्वजनैः दारैः पुत्रैःमे धनमादाय गृहीतश्च। अयमर्थः अपरिमितधनसञ्चयोऽ हमेवमचिन्तयं, पूर्वजन्मनि सञ्चितसुकृतसञ्चयतयाऽहमस्मिन्परिमितधनसञ्चयकुले सञ्जातः। अतोमया भोगमात्रपरतया न भवितव्यम् किन्तु दानादिधर्मपरतयैव भवितव्यमित्यध्यवस्य मयि धर्मे प्रवर्तमाने सति पुत्रादय उन्मत्तोऽयमिति लोकवार्तामुद्भाव्य स्वबन्धुभिः मातुलादिभिः सह सममन्त्र्य मां निगलश्रृङ्खलयान्यरुणत्। आत्मबन्धुभिः, निरस्तश्च मोक्षितश्च मां बद्धं ज्ञात्वा मम सब्रह्मचारिण आगत्य निगलश्रृंखलायाः मां मोचयामासुः। मुक्तोऽहमचिन्तयम् - अस्य सहायभूताः केचन सन्तीति मत्वा माममी निहन्युरिति मत्वा अतिदुर्लभमिमं मानुषं देहं अहं वृथा न जहामि। तपोवनं प्राप्य सत्सेवया कृतार्थीभूयासमिति निश्चित्य वनमभ्यागतः। दुःखी, मद्बन्धुभिरहन्निरस्तः इत्यनुस्मृत्य मे मनसि महद्दुःखं वर्तते। संप्रति ममेदन्नदुःखकारणं तद्वृत्तान्तापरिज्ञानमेवेत्याह - सोऽहमिति॥ सोऽहं पुत्राणां प्रवृत्तिं कुशलाकुशलात्मिकां न वेद्मि। पुत्रादिभिः परित्यक्तो वनमागतोऽहं. तथासति, तेषु द्वेषस्यैवावकाशः समम तथापि न भवति. किन्तु तेषु स्नेहपारवश्यात् तत्कृता या प्रवृत्तिः सा, किं सुखरूपा दुःखरूपा इति निश्चयाभावाद्व्याकुलत्वमेव भवति। तथा स्वजनानां प्रवृत्तिञ्च कुशलाकुशलात्मिकां न वेद्मि। दाराणाञ्च प्रवृत्तिं कुशलाकुशलात्मिकां न वेद्मि। पुत्रादि प्रवृत्ति याथार्थ्य परिज्ञानमेव मम सांप्रतं दुःखहेतुः न तत्परित्याग इति भावः।

तत्तर्हि तत्र गत्वा भूयः तज्ज्ञानाय यत्नः क्रियतामिति। तत्राह - अत्र संस्थित इति। अहमिह कथञ्चित् गृहान्ध कूपान्निर्मुक्तः मोक्षद्वारं वनमागतः इतो गन्तुं नेच्छामीति भावः॥

एतदेव स्फुटयत् दाराणां स्वजनानाञ्च तदधीन्यात् स्वस्य तेषु ममत्वातिरेकाच्च पुत्रविषयामेव चिन्तां दर्शयति। किन्तु तेषामिति। संप्रति तेषां अर्थस्य स्वाधीनत्वात् क्षेमस्यावकाशः. स्वाधीनत्वे बन्धूनान्नचेदर्थलाभादक्षेमस्याप्यवकाशः अर्थमूलो हि मत्परित्यागः। संप्रति तेषां सद्वृत्तत्वे दुर्वृत्तत्वेप्यवकाशः स्वाधीनधनानामविवेकिनामसद्वृत्तत्वम्, विवेकिनां सद्वृत्तत्वं तत् कथन्त्वधुना भवति इति च मे चिन्तया व्याकुलीभावो भवतीति मे सुताः। तेषां सद्वृत्तत्वे मे सुखं न चेद्दुःखमिति चिन्तया मे हृदयं दूयत इति भावः।

राजोवाच ॥ २६ ॥

यैर्निरस्तो भवाँल्लुब्धैः पुत्रदारादिभि र्धनैः॥ २७ ॥
तेषु किं भवतः स्नेहमनुबध्नाति मानसम् ॥ २८ ॥

एवं वैश्ये स्वप्रश्नोत्तरमुक्तवति सुरथः स्वसदृशोऽयमिति मत्वा तद्दृढीकरणाय पृच्छति - यैरिति॥

त्वत्पूर्वजैः त्वया चोपार्जितद्रव्यसञ्चयं कात्स्नर्येन स्वाधीनं कर्तुं ये पुत्रादयः त्वां त्यक्तवन्तः, तेषु कुतस्तव मानसं सस्नेहं भवति। तत्कारणं ब्रूहीति। एवं पृष्टो वैश्य आह - एवमेतदिति॥

वैश्य उवाच॥ २९ ॥

एवमेतद्यथा प्राह भवानस्मद्गतं वचः॥ ३० ॥
किं करोमि न बध्नाति मम निष्ठुरतां मनः।
यैः सन्त्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः॥ ३१ ॥
पतिस्वजनहार्दं च हार्दि तेष्वेव मे मनः।
किमेतन्नाभिजानामि जानन्नपि महामते॥ ३२ ॥
यत्प्रेमप्रवणं चित्तं विगुणेष्वपि बन्धुषु।
तेषां कृते मे निःश्वासो दौर्मनस्यं च जायते॥ ३३ ॥
करोमि किं यन्न मनः तेष्वप्रीतिषु निष्ठुरम्॥ ३४ ॥

तत्र तावत्, एतत्कारणं न जानामीति वक्ष्यन् तदपालम्भं विषयं, अविषये स्नेहपारवश्यं अनुवदति। एवमेतदिति॥ भवानस्मद्गतं वचः प्राह यथा प्राह भवान् एतदेव मम मनसि प्रतिभासमानार्थगोचरं वचनं त्वमवादीः। अर्थलोभादेव त्वां परित्यक्तवन्तः, तेषु परमार्थतो न स्नेहावकाश इति यत् त्वयोक्तं तत्तथैव ममापि स्फुरति। एतत् यथार्थञ्च इत्यर्थः। एवमात्मनो ममत्वपारवश्यमुक्त्वा तत्प्रहाणोपायजिज्ञासया तदसहमान आक्रोशते किं करोमीति॥ ममापकर्तृषु तेषु मनसो नैष्टुर्या स्थितौ श्रद्धा भक्तिपुरस्सरमुपायाञ्चक्रतुः। तावित्युक्तो विवृणोति - समाधिर्नामेति, असौ स इति पदद्वयेन राज्ञः पूर्वा ते त्वं वैश्यस्य पश्चादागत्वं च सूचितम्। भाव एव। किन्तु तेषामपकर्त्तृत्वावगमेऽपि स्नेहपारवश्यमपि जायत इत्याह - यैरिति॥ यैः पुत्रदारस्वजनैः पितृस्नेहं, पतिस्वजनहार्दञ्च पतिहार्द्रञ्च जनहार्द्रञ्च धनलुब्धत्वात् योऽहन्निराकृतः मे मनः तेष्वपहार्देव इत्यन्वयः। अयमर्थः लोके पुत्राणां ममायं पितेति मत्वा यो स्नेहो जायते, भार्याया मम पतिरिति। स्वजनानामस्मदीयोऽयमिति यः स्नेहो जायते, तमपहाय मम पुत्रदारस्वजनाः अर्थलोभान्मां परित्यक्तवन्तः। तथापि तेषु मे मानसं ममत्वेन मुह्यमानं भवतीति. तर्हि तत्कारणं किमिति चेत्तत्राह - किमेतदिति। एतज्ञानन्तपि किमेतदिति नाभिजानामि। एतत् पुत्रादीनां निस्नेहत्वं जानन्नपि एतत्तेषां निस्नेहत्वे जायमानेपि तेषु स्नेह समूढत्व कारणं न जानामि। एतदेवाह - यदिति॥ बन्धुषु पुत्रादि विगुणेषु स्नेहादिगुणशून्येषु अपि, मम चित्तं प्रेम्णा प्रवणमाकृष्टं यत्, तत्कारणं किमिति न जानामीति। प्रेमप्रावण्यञ्च मम स्फुटमेव मां पश्यतस्त इत्याह - तेषामिति। ममत्वपारवश्यमसहमान आक्रोशन्नाह :- करोमि किमिति॥ अप्रीतिषु अप्रियाष्विति यावत्। अप्रियेष्विति वा पाठः।

मार्कण्डेय उवाच

ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ ॥ ३६ ॥
समाधिर्नाम वैश्योऽसौ स च पार्थिवसत्तमः।
कृत्वा तु तौ यथान्यायं यथार्हं तेन संविदम्॥ ३७ ॥
उपविष्टौ कथाः काश्चित् चक्रतुर्वैश्यपार्थिवौ।

हे विप्र, ततः वैश्यवाक्य श्रवणानन्तरं राजाप्यात्मवृत्तान्तं तस्मै समुपदिश्य स्वस्यापि तादृशत्वं विज्ञाप्य आवयोः दुःखमोक्षसाधनं मुनिसकाशादवगन्तव्यं इत्यवधार्यान्योन्यमैकमत्यं प्राप्य तं मुनिं लब्धावसरं सुमेधसं समुपस्थितौ श्रद्धाभक्तिपुरस्सरमुपासाञ्चक्रतुः। तावित्युक्तौ विवृणोति॥ समाधिर्नामेति। असौ स इति पदद्वयेन राज्ञः पूर्वागतत्वं वैश्यस्य पश्चादागतत्वञ्च सूचयति। तौ तु वैश्यपार्थिवौ ऋषिमुपतिष्ठन्तौ. समाधिसुरथौ यथान्यायं यथार्हञ्च तेन संविदं कृत्वा यथान्यायं यथार्हञ्चोपविष्टौ काश्चित् कथां चक्रतुरिति।

अत्रन्यायशिष्टाचारः तौ सुरथवैश्यौ मुनिमुपतिष्ठन्तौ शिष्टाचारानुरोधेनात्मनो योग्यत्वानुरोधेन च संविदं कृत्वा दर्शनक्षणे योग्यं व्यवहारं कृत्वा मुनेरनुज्ञां लब्ध्वा यथाक्रमं तदुचितासने उपविश्य तत्काले योग्याः कथाः कथयामासतुः इति। वैश्यपार्थिवाविति पदद्वयेन तयोः सत्कौशलन्दर्शयति - वाणिज्यादि व्यापृतत्वात्, परिपालननिरतत्वाच्च लोकवृत्तान्तज्ञो हि।

राजोवाच

भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत्॥ ४० ॥
दुःखाय यन्मे मनसः स्वचित्तायत्ततां विना।
ममत्वं गतराज्यस्य राज्याङ्गेष्वखिलेष्वपि॥ ४१ ॥
जानतोऽपि यथाज्ञस्य किमेतन्मुनिसत्तमं।
अयं च निकृतः पुत्रैर्दारैर्भृत्यैः तथोज्झितः॥ ४३ ॥
स्वजनेन च संत्यक्तः तेषु हार्दी तथाप्यति।
एवमेष तथाहं च द्वावप्यन्यन्तदुःखितौ॥ ४४ ॥
दृष्टदोषेऽपि विषये ममत्वाकृष्टमानसौ।
तत्किमेतन्महाभाग यन्मोहो ज्ञानिनोरपि॥ ४५ ॥
ममास्य च भवत्येषा विवेकान्धस्य मूढता॥ ४६ ॥

तेन तत्र प्रश्नावसरे राजा विवित्सितं पृच्छति - भगवन्निति। तत्र भगवन्निति सम्बुद्ध्या गुरोः पूजा क्रियते। गुरवो हि प्रत्यक्षेण स्तोतव्याः, स्तुतिपरश्च भगवच्छब्दः। तस्य सर्वज्ञतावाचकत्वात्। तथा च श्रूयते -

उत्पत्तिं च विनाशञ्च भूतानामागतिं गतिम्।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति॥

हे भगवन्, अहं त्वामेकं यत्किञ्चिद्विवित्सितं वस्तु प्रष्टुमिच्छामीति वदता गुरोरनुवृत्तिः क्रियते। यद्यस्ति ते मयि कृपा तर्हि तत्पृच्छामीति भावः। वदस्व तत्। मम विवित्सितं वदस्व, तर्हि किं विषये यत्ते विवित्सा इति विवक्षायामाह - दुःखायेति॥ यन्मे मनसो दुःखाय भवति। स्वचित्तायत्ततां विना आत्माधीनतां विना, पारवश्येनेति यावत्। तर्हि किं तदित्यपेक्षायामाह ममत्वमिति। जानतोपि ममत्वस्य दुःखहेतुत्वज्ञानतोपि, किमेतत्। कस्मादेतत्. अयं च मादृश इत्याह - अयं चेति। प्रश्नमुपसंहरति - एवमिति॥ अत्र हेतुः। दृष्टदोष इति। विषयः पुत्रादि लक्षणः दोषः कार्पण्यद्वेषादि लक्षणः दोषः कार्पण्यद्वेषादिलक्षणः, नश्वरत्वादि लक्षणो वा। मोहःपुत्रादि ममत्वपारवश्यलक्षणः मूढता, स एव मोहः। विवेकः तद्धेतुविचारः। तत्रान्धस्येति साधारणमेतद्विशेषणं.

ऋषिरुवाच ॥ ४६ ॥
ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे ॥ ४७ ॥

विषयाश्च महाभाग यान्ति चैवं पृथक् पृथक्।
दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथा परे ॥ ४८ ॥

केचिद्दिवा तथा रात्रौ प्राणिनः तुल्यदृष्टयः।
ज्ञानिनो मनुजाः सर्वे किंनु ते नहि केवलम् ॥ ४९ ॥

यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः।
ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणाम् ॥ ५० ॥

मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः।
ज्ञानेऽपि सति पश्यैतान् पतङ्गाञ्छावचञ्चुषु॥ ५१ ॥

कणमोक्षादृतान्मोहात्पीडयमानानपि क्षुधा।
मानुषा मनुजव्याघ्र साभिलाषाः सुतान्प्रति ॥ ५२ ॥

3

लोभात्प्रत्युपकाराय नन्वेतान् किं न पश्यसि।
तथापि ममतावर्ते मोहगर्ते निपातिता: ॥ ५३ ॥

महामाया प्रभावेण संसारस्थितिकारिणा।
तन्नात्र विस्मय: कार्यो योगनिद्रा जगत्पते: ॥ ५४ ॥

महामाया हरेश्चैतत् तया संमोह्यते जगत्।
ज्ञानिनामपि चेतांसि देवी भगवती हि सा ॥ ५५ ॥

बलादाकृष्य मोहाय महामाया प्रयच्छति।
तया विसृज्यते विश्वं जगदेतच्चराचरम् ॥ ५६ ॥

सैषा प्रसन्ना वतदा नृणां भवति मुक्तये।
सा विद्या परमा मुक्तेर्हेतुभूता सनातनी ॥ ५७ ॥

संसारबन्ध हेतुश्च सैव सर्वेश्वरेश्वरी ॥ ५८ ॥

एवं पृष्टोमुनिवर: तदुत्तरं वक्तुमुपक्रमते - ज्ञानमस्तीत्यादिना। तत्रानयोर्ज्ञानाभिमानं विधूयानुग्राह्यावेताविति मन्वान: तज्ज्ञानस्य सर्वजन्तुसाधारण्येन विषयविषयत्वाविशेषात् असारत्वमोहमूढत्वेनावेदयत्। मोहस्य महामायाविरचितत्वं, तस्याश्च स्वभक्तिरतेषु मोहोत्पादनद्वारा संसरनिदानत्वं। इतरेषु ज्ञानोत्पादनद्वारा मुक्तिहेतुत्वञ्च तयोरुपदिशन्ति। तत्रैवमाह - हे महाभाग ज्ञानिनोरप्यावयो: कथं मोह इति यत् त्वया पृष्टन्तदेतन्न सङ्गच्छते। ज्ञानाज्ञानयो: तम:प्रकाशयोरिव विरुद्धस्वभावत्वेन युगपदैकाधिकरण्यायोगात्। नहि प्रकृष्टप्रकाशे सहस्रकिरणे निबिडतरं तम: सम्भवति। तस्माद्वैषयिकमेव ज्ञानं युवयो: ज्ञानत्वेन सम्मतम्। न तदज्ञानस्य निवर्तकम् तन्मूलत्वात्। नहि कार्यं स्वकारणं व्यभिचरति। तस्मात् सर्वजन्तुसाधारणमेतत् युवयो: ज्ञानमित्युपपादयन्नात्मज्ञानस्यातिदुर्लभत्वं समर्थयति :- ज्ञानमस्तीत्यादिना॥

युवयो: ज्ञानमस्तीत्येव, तत्र ममापि न संशय:। किन्तु, नकेवलं युवयोरेव, समस्तस्य जन्तो:। तर्हि सर्वे किन्तु मुच्यन्तेतत्राह - विषयगोचरे

इति। विषयविषयमेव हि ज्ञानं सर्वेषां विद्यते। तच्च विद्यत एव. नत्वात्मविषयं. वैषयिकं ज्ञानं ह्यज्ञानमूलम्.

अथ विषयज्ञानस्यापार्थकत्वमविद्याविरचितत्वेन तद्विषयाणां मिथ्याभूतत्वात्तत्वज्ञानिविशेषानुरोधेन भिन्नविषयतया प्रतिष्ठितत्वाच्च पुरुषार्थसाधनाभावमुपपादयति - विषयाश्चेति॥ सर्वजन्तूनां यद्वैषयिकं ज्ञानं विद्यते तद्विषया ये विषयाः ते तु जातिं पृथक् पृथक् यान्ति जन्तूनामानन्त्यात्, तद्विषयाणाञ्च तद्वद्बहुत्वात्। तज्ज्ञानमपि बहुमुखं, अतो यत्किञ्चिदेतत् न कार्य क्षममिति भावः। यद्वा एक एव हि विषयः एकैकस्य एकैकधास्फुरति। अतोनिर्द्धारितरूपत्वाद्यत्किञ्चिदेतदिति। तथा च श्रूयते :-

परिव्राट् कामुकशुनामेकस्याः प्रमदा तनोः।
कुणपं कामिनीभक्ष इति तिस्रो विकल्पनाः ॥ इति

अथ कालतोपि विषयज्ञानस्याज्ञानमिश्रितत्वेनाप्रतिष्ठामाह - दिवान्धा इति। दिनान्धा नत्यूहादयः रात्र्यन्धा डुण्डुभादयः उभयत्र तुल्यदृष्टयः पश्वादयः। अयं भावः॥ विषयज्ञानस्य यथातथ्ये सर्वेषां सर्वदा निर्विशेषमेव निरन्तरं भासते। न चैवं, अतोयत्किञ्चिदेवैतदिति भावः। सर्वेषां ज्ञानमस्तीति साधयता त्वया मनुष्याणां ज्ञानं नास्तीति समर्थ्यते. किं वै इत्याशङ्कायां तन्न, इतरेषामपि तदस्तीत्येवेत्याह - ज्ञानिनो मनुजा इति॥ मनुजाः ज्ञानिनः इति तव मतं, सत्यम्, तन्न मुधा, यथार्थमेवैतत्. किन्तु तत्र विशेषोऽस्ति. ते हि केवलं मनुष्य एव, न केवलं ज्ञानिनः. कुतः। यतः सर्वे पशुपक्षिमृगादयोपि ज्ञानिनः। पशुपक्षिमृगादीनां ज्ञानसद्भावो मया साद्ध्यते न मनुष्याणां तदसद्भावः इति भावः। इयानिह विशेष इत्याह - ज्ञानमिति॥ यत्तेषां मृगपक्षिणां ज्ञानं अवघ्राणनादिना स्वकीयवत्सादिज्ञानं तत् तादृशं ज्ञानं मनुष्याणां न. यत्त्र पुनर्मनुष्याणां ज्ञानं धूमादनाग्न्याद्यनुमानं तत् तेषां मृगपक्षिणामपि न इतीयानेव विशेषः। अन्यज्ञानयुक्तमात्रमुभयोस्तुल्यन्निर्विशेषं।

यद्वा, अन्यत् आत्मज्ञानं उभयोस्तुल्यं, क्वचित्, कस्यचित् भाग्यत एवास्तीति भावः। तिर्यक्त्वपि तदस्तीति पुराणादिषु प्रसिद्धम्। संप्रति ज्ञाने सत्यपि मोह इत्येतन्न चित्रम्। यतो हि द्विविधं ज्ञानं आत्मज्ञानं

विषयज्ञानं चेति। तत्रात्मज्ञानमोहयोरेकाधिकरण्यं न संभवति। विषयज्ञानमोहयोस्तु तत्संभवत्येव। अज्ञानमूलत्वाद्विषयज्ञानस्येति प्रतिपादयन् पतङ्गादीनामपि विषयज्ञान मस्तीत्येतद्विशदीकुर्वन्नाह - ज्ञानेपीति॥ एतान् पतङ्गान्. अत्र एतानित्या श्रमनिकटवर्त्तिमहीरुहविटपनीडप्रवेशनिर्गमनव्यापारपरान् पतङ्गानङ्गुल्या निर्दिशन्नाह। एतान् पश्यतः तव ज्ञानमोहयोरैकाधिकण्यनिश्चयः स्यादिति भावः। कथमित्शङ्कायां तद्विशेषणमुखेन तत्प्रकारमाह-

शावचञ्चुषु कणमोक्षादृतानिति॥ शावः पोतः, चञ्चुः तुण्डः कणं क्षेत्रादाहृतं धान्यलवं। यद्वा, उद्धूयनविधिपरित्यक्तसूक्ष्मतण्डुल सञ्चयः, मोक्षो दानं तत्रादृतान्. तत्र कृतादरान्. क्षुधापीडच मानानपीति। तदुपयुक्तावशिष्टौ क्षणपरत्वात् कल्प्यते। अयमर्थः एते खलु पतङ्गादेशान्तरं प्राप्य धान्यजातमानीय नीडस्थानां स्वपोतानां चञ्चुपुटेषु सादरं वितरन्ति। पुनःसदुपयुक्तावशिष्टं स्वयमुपजीवन्ति च। तस्माद्विषयज्ञानं पुत्रादिषु ममत्वलक्षणो मोहश्च पतङ्गादीनामप्यस्तीति गम्यते इत्युपपादयितुं अत्र हेतुमाहज्ञाने सत्यपि मोहादिति। तस्माद्युवयोः ज्ञानं मोहश्च युज्यते। युवयोर्हि ज्ञानं वैषयिकं, एवन्नह्यात्मगोचरमिति भावः। अहो, तर्हि, मनुष्याणां मृगपक्षिणाञ्च समान एवमोहः इति चेत्तत्र मोहप्राबल्यमितरेभ्यो मनुष्याणामेवेत्यपि वक्तुं शक्यमिति भावेनाह - मानुषा इति। हे मनुजव्याघ्रमानुषाः, लोभात् स्वशरीरलोभात्, सुतान् प्रति प्रत्युपकाराय साभिलाषाः पुत्रान् पोषयन्तो मानुषाः, स्वशरीरमात्मत्वेन मन्यमानाः स्वपुष्टैः तैः योगक्षेममिच्छन्तः तत्पोषणं कुर्वन्ति।

न चैवंविधामति पतङ्गदीनां. तस्मात् मोहप्राबल्यं पतङ्गादिभ्यो मनुष्याणां इत्यपि वक्तव्यमिति भावः। एतान् पश्यसि ननु. किन्न पश्यसि। एतत्तव प्रत्यक्षमेवेति भावः। तर्ह्ययं मोहः केन कृतः इति विवक्षायामाहतथापीति॥ सर्वे जनाः, तथापि उक्तलक्षणे ज्ञाने सत्यपि महामायाप्रभावेन मोहगर्त्ते निपातिताः, प्रभावः सामर्थ्यं, मोह एव गर्तो मोहगर्तः। अनात्मन्यात्मबुद्धिः अस्वे स्वत्वबुद्धिश्च मोहः तस्योदपानसामर्थ्य धर्म्यं, तत्रस्थानां, तत आत्मानं निर्मोचयितुं स्वातन्त्र्याभावाद्दुःखभयादि दोषबाहुल्याच्च. यथा कूपे पतितं

तदुपरि वर्तमानाः पाशादिना ततः समुद्धरन्ति, तथा संसारकूपपतितं सद्गुरव इति चानेनद्योतितम्। ममता ममत्वमेवावर्तो यस्मिन् ममत्वं पुत्रादिषु स्नेहः तस्यावर्तसाम्यम्. स्वाश्रयविमोहकत्वाविशेषात् किमर्थं महामायाप्रभावो जगन्मोहयतीति विवक्षाया जननमरणात्मकसंसारस्थितये तत्स्थिरी करणञ्च तस्य स्वभाव इति प्रतिपादयति - संसारस्थितिकारिणेति। अहो निखिलमपि जगन्मोहयितुं प्रभावः कस्य इत्यत्र विस्मयो न कार्य इति प्रतिपादयितुमाह - तदिति। तत् तस्मात्

अत्र निखिलजगन्मोहनं विषयीकृत्य विस्मयः। चित्रबुद्धिर्न कार्यः। कस्मात्, यतः हरेरपि योगनिद्रायोगापदेशेन स्वापकारिणीजगत्पतेः, सखलु जगत्स्वाम्यहमित्यभिमानवान्। तस्यापि स्वापकारिणीखलुसा. तया विभ्राम्यते जगत् तस्माज्जगत्तया विभ्राम्यत हत्येतन्न चित्रमिति भावः। ननु जगत्तया विभ्राम्यत इति न वक्तव्यम्। द्विविधाःखलु जनाः, अज्ञाः प्राज्ञाश्र्येति। तत्र प्राज्ञानां मोहं कर्तुं इयन्न प्रभवतीत्यतो हेतोरिति विवक्षायामाह - ज्ञानिनामपीति। ज्ञानिनोऽपि महामाया भक्तिविहीनाश्चेन्मुह्येयुरेव. तस्माज्जगद्विभ्राम्यत इत्युक्तं युक्तमिति निगमयति -: तयेति। तथोक्तलक्षणया महामायया चराचरजगत्स्थावरजङ्गमात्मकं जगद्विश्वं समस्तं विभ्राम्यते विविधं भ्राम्यते। एकैकप्रकारेणैककं जगद्भ्राम्यते संसार्यते इति अमुष्याः सकलजगन्मोहनव्यापारनिकरत्वात् प्रतीयमानान्निर्दयतान्निवारयति - सैषेति॥ सैषा निखिलजगन्मोहिन्यप्येषा प्रसन्नास्वयं आराधनपरितुष्ठा स्वभक्तानां वरदाऽभीष्ट भोगप्रदात्री नृणां सर्व्ववर्णाश्रमिणां, मुक्तये च भवति। मुक्तिः संसारबन्ध निवृत्तिः तदर्थं च भवति

नन्वविद्यारूपिण्याः कथं मोक्षहेतुता. तत्राह - सेति। सा विद्या किं कर्मादि गोचरा नेत्याह - परमा इति ॥ अध्यात्मगोचरा तस्या एव ही परमता नान्यस्य सति प्रतिपादयितुं. तांविशिनष्टिमुक्तेः हेतुभूतेति॥ यद्वा यत इयं परमा विद्या अतः मुक्तेः हेतुभूतेति निगमनमेतत्।

नन्वद्वितीयात्मतत्वस्य अमुष्याश्च विषयविषयि भावे सद्विती यत्वमनात्मत्वं वा प्रसज्येतात्मन इत्याशङ्कां परिहरति -: सनातनीति॥

विद्यारूपेणात्मानं प्रकाश्य गम्यगमकभावं विहायात्मताद्रूप्येणाव स्थानान्नित्येत्युक्तिः। सैव उक्तरूपेयमेव, अविद्या च भोगप्रदाचेयमेवेत्याह - सैव सर्वेश्वरेश्वरीति। ब्रह्मादीनामपि नियामिका शक्तिरियं, तस्मादैश्वर्यकामिष्वियमेवैश्वर्यं प्रयुञ्जाना इति भुक्तिमुक्तिप्रदानसामर्थ्यो क्तिरिति।

राजोवाच ॥ ५९ ॥

भगवन् का हि सा देवी महामायेति यां भवान् ॥ ६० ॥

ब्रवीति कथमुत्पन्ना सा कर्माऽस्याश्च किं द्विज।
यत्प्रभावा च सा देवी यत्स्वरूपा यदुद्भवा ॥ ६१ ॥
सत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥ ६२ ॥

तथा राजा महामायाया भक्तान्प्रति भोगमोक्षप्रदान निरतत्वं प्रसङ्गाच्छ्रुत्वा तत्सेवया तत्सिद्धिमाशासमानो ज्ञाततत्स्वरूपस्य तत्सेवानधिकारात् स्वस्य तत्राधिकारसिद्धये तत्स्वरूपं जिज्ञासुः पृच्छति - भगवन्निति। हे भगवन् आत्मानात्मविवेचनविशारदां यां भवान् महामायेति ब्रवीति सा देवि का हि, सा किन्नित्या उतानित्येर्थः। कथमुत्पन्ना तस्या उत्पत्तिप्रकारश्च कीदृशः, सा नित्या चेत्कथमुत्पत्तिस्तस्या घटते. न चेत् केनप्रकारेणोत्पत्तिः. अस्याः कर्म च किं? उत्पन्नया पुनः किं कर्म क्रियते यत्स्वभावा च सा देवी, तस्याः स्वभावश्च कीदृशः। किं व्यामा उताव्यामा, यत्स्वरूपा यत्स्वरूपं च तस्याः कीदृशं, किं राजसं, उत्त सात्विकं तामसं वा, यदुद्भवा तस्याः उद्भश्च यदर्थं, तत्प्रयोजनंह च किमित्यर्थः। तत्सर्वं श्रोतुमिच्छामि तदेतत्सर्वं श्रोतुमिच्छामि. तत्रापि त्वत्तः श्रोतुमिच्छामि। अत्र हेतुः ब्रह्मविदां वरेति। सर्वज्ञो हि भवान्. तथाचात्मविदः सर्वज्ञत्वं श्रूयते - आत्मनि विज्ञाते सर्वमिदं विज्ञातं भवतीति। एवं पृष्टो मुनिः तदुत्तरमाह - नित्येत्यादिना॥

ऋषिरुवाच ॥ ६३ ॥

नित्यैव सा जगन्मूर्तिः तया सर्वमिदं ततम् ॥ ६४ ॥

तथापि तत्समुत्पत्तिः बहुधा श्रूयतां मम।
देवानां कार्यसिद्धयर्थमाविर्भवति सायदा ॥ ६५ ॥
उत्पन्नेति तदा लोके सानित्याप्यभिधीयते।
योगनिद्रां यदा विष्णुः जगत्येकार्णवीकृते ॥ ६६ ॥
आस्तीर्य शेषमभजत्कल्पान्ते भगवान् प्रभुः।
तदा द्वावसुरौघोरौ विख्यातै मधुकैटभौ ॥ ६७ ॥
विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ।
स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः ॥ ६८ ॥
दृष्ट्वा तावसुरौ चोग्रौ प्रसुमं च जनार्दनम्।
तुष्टाव योगनिद्रां तामेकाग्रहृदयस्थितः ॥ ६९ ॥
विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम्।
विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ॥ ७० ॥
निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ॥ ७१ ॥

नित्येव सेवति काहीत्यस्योत्तरं जगत्सूतिरिति। कर्मचास्याश्च किमित्यस्यत्तोरं तस्याः कर्म जगत्सृष्टिरित्यर्थः। उपलक्षणञ्चेतत् स्थिति संहारयोः. तया सर्वमिदं ततं, इदं जगत् ततं व्याप्तं कारणस्य कार्यव्यापित्वात्. यथा मृत्कार्यं घटादि, मृदा व्याप्तं तथा प्रकृतिकार्यं जगत्तद्व्याप्तं, तथापि सा व्याप्तानित्या च, तथापि तत्समुत्पत्तिं मम मत्तः बहुधाऽनेकधा श्रूयताम्। सा तामसी राजसी सत्विकी चेति त्रैविध्येन श्रूयताम्। अनेन यत्स्वरूपेत्यस्योत्तरमुक्तं इति. कथं नित्याया व्याप्ताया: उत्पत्तिः इत्याशंकां परिहरन् यदुद्भवेत्यस्योत्तरञ्च कथयति - देवानामिति॥

सा यदा देवानां कार्यसिद्धयर्थं त्रैलोक्यपरिपन्थि परिहारार्थमाविर्भवति स्वेच्छागृहीतविग्रहा प्रत्यक्षीक्रियते। तदा सा नित्याप्युत्पन्नेत्यभिधीयते इति. अत्र देवानां कार्यसिद्धयर्थ मित्यनेन यदु द्भवेत्यस्योत्तरमुक्तं वेदितव्यम्। एवं भगवत्याः प्रादुर्भावबाहुविद्धयं प्रति प्रतिज्ञाय संप्रति तस्याः तामसावतारं वक्तुं तदवकाशापत्तिप्रकारं प्रदर्शयितुमुपक्रमते - योगनिद्रामित्यादिना।

यदाविष्णुः शेषमास्तीर्य अनन्तभोगमास्तीर्य पर्यङ्कीकृत्य योगनिद्रा

मभजत्। तदा द्वावसुरौ विष्णुकर्णमलोद्भूतौ ब्रह्माणं हन्तुमुद्यतौ इति अथ यदेद्युक्तं कालं प्रदर्शयति - कल्पान्ते ब्रह्मणोऽहरवसाने जगति त्रैलोक्यं एकार्णवीकृते एकार्णवभावमापन्ने सति तेन तत्तथाकृतं एवं कस्मिंश्चित्काले गते ब्रह्मणो निशावसाने संप्राप्ते शनैःशनैः,

प्रबुद्ध्यमानो भगवान् त्रैलोक्यविलयसमयसमुच्छ्वसितवातप्रातविधूत संभिन्न सप्तजलधिलहरीसमास्फालनाकृष्टवसुन्धरासारं स्वकर्णयुगलं शष्कुलीलग्नं कर्णमलायमानं स्वकरकनिष्टाङ्गुल्या समुत्कृष्य प्रलयाब्धौ विससर्ज तदेतत् पृथिवीसारं भगवत्करस्पर्शात्तेजोमिळितं प्रलयाम्भसि पतितवादाम्भोविनिश्रितं वायुना दोधूयमानं सावकाशं कयोश्चिज्जीवविशेषयोः कर्मविशेषपरिपाकवशात् शरीरद्वयाकारेणपरिणतं पञ्चभूतविकारात्मकं प्रलयांभसि भवनेनेतस्ततः सञ्चार्य्यमाणं नारायण नाभिसरः समुत्थितनवनलिनकर्णिकापीठमध्यवर्त्ति चतुर्मुखोनिशावसाने शनैः शनैः निमीलितनयनः स्वनिकरवर्ति तच्छरीरयुगलमद्राक्षीत्। दृष्ट्वा च तत्किमिति कराम्बुजेन पस्पर्श। तत्रैकं मृद्वभवत्, अपरं कठिनञ्च, तत्समय एव तच्छरीरयुगलं सकलप्रजाकर्तुः कराम्बुजस्पर्शमात्रेण सचेतनमजायत। तत्र मार्दवयुक्तस्य मधुरिति संज्ञा, कठिनस्य कैटभइति संज्ञा च, तेत कृता. इत्येवमुत्पन्नौ तौ मधुकैटभाविति विख्यातौ, चिरकालसंभूतौ तपसा ब्रह्मणो वरान् लब्ध्वा प्रलयांभसि सञ्चरमाणौ बाहुवीर्यमदोद्रिक्तौ युद्धलालसौ अलब्धप्रतिस्पर्धिनौ कृतोपकारमपि ब्रह्माणं मदोद्रेकादननुस्मृत्य तं हन्तुं कृतोद्यमौ इति। तदा ब्रह्मणः प्रवृत्तिमाह - स इति। सः ब्रह्मा तदा योगनिद्रां तुष्टाव इति। किमर्थं, हरेः प्रबोधनार्थाय. कस्मात्तुष्टाव तावसुरौ घोरौ दृष्ट्वा आत्मानं हन्तुमुद्यतौ मधुकैटभौ निर्दयौ ज्ञात्वा जनार्दनं दुष्टनिरसनशीलं हरिं प्रसुप्तञ्च ज्ञात्वा तत्प्रबोधनाय योगनिद्रां तुष्टाव। तर्हि स एव स्तूयतां किमियमिति विवक्षायां अस्या एव तद्योग्यतेति वक्तुं हरिणेत्रकृतालयामिति विशेषणम्। सैव हि योग व्यपदेशेन तस्य काये निवसति. तस्मात् सैव तद्योगनिद्रेतिभावः। विष्णोः स्वापप्रबोधौ ब्रह्मणा ज्ञातव्याविति वक्तुम्। विष्णोः नाभिकमले स्थित इति तद्विशेषणं। प्रजापतिरिरिति। विष्णोः मद्यमायायाश्चायं प्रियः तत्कुतोऽयमस्याधिकार इति

भाव:। एकाग्रहृदयस्थित इति तात्कालिकविशेषणं, तदानीं तस्य कृच्छ्रगतत्वात् बलाद्भक्तिरुत्पन्नेति भाव:। तस्य स्तुतिप्रकारमाह विश्वेश्वरीमित्यादिना। तत्र तावत् महामाया स्तवोद्यतेन प्रजापतिना चिकीर्षितप्रतिज्ञारूपया वाचा परिच्छेद्यस्य मत्स्वरूपस्य परिच्छेदादयं प्रवृत्त: इति मयि भवत्या: कोपो मा स्यादित्याशंसनाभिप्रायेण तदाभिमुखकरण प्रकारमाह - विश्वेश्वरीमित्यादिना। अहं विष्णो: निद्रां स्तौमि इति योजना। तदर्थं सा मम तावत् स्तुतिपरवाग्विभूतिप्रसरमनुगृह्णातु। अपरिच्छेद्यं मत्स्वरूपं परिच्छेत्तुमयं प्रवृत्त: इति मत्वा मयि संरम्भ: जह्यादिति भाव:। तत्र विष्णो: निद्रेद्युक्तौ राज्ञ: पुरुष इत्युक्ताविव तस्या: तत्पारतन्त्र्य प्रतीते: तत्स्तुतेरानर्थक्यमाशङ्क्य तत्परिहाराय तां विशिनष्टि - विश्वेश्वरीमिति। इयमेव विश्वेश्वरी विष्णुश्शरीरग्रहणमित्यादौ विष्ण्वादीश्वराणामेतत्परतन्त्रतया वक्ष्यमाणात्वादिति भाव:। विश्वस्य जगत: ईश्वरी विश्वेश्वरी विश्वा सर्वाचेयमिति ईश्वरी चेति वा तां, नन्वियमेव विश्वात्मिका तत्स्वामिनी च इत्यत्र किं मानमित्साशङ्क्य क्रमेणोत्तरमाह - जगद्धात्रीमित्यादिना. जगत: चतुर्दशभुवनस्य धात्रींतां भावकार्यस्य चोपादानकारणवत्त्वनियमात् जगतश्च कार्यभूतस्य कारणान्तरस्य दुर्निरूपत्वात् घटस्य मृदिव विश्वस्योपादानभूते यमेव,

कार्यस्य कारणसत्वमन्तरेण सत्वानिरूपणादस्या विश्वात्मकत्वं युक्तमिति भाव:। स्थितिश्च संहारश्च स्थितिसंहारौ, तौ कर्तुं शील मस्या इति स्थितिसंहारकारिणी, तौ च कर्त्रन्तरस्य दुर्निरूपत्वात्तामेव कर्त्रीमनुमापयत:। तथा च प्रयोग:। विवादपदं विशिष्टकर्तृकं, विशिष्ट कार्यत्वात्, चित्रादिकार्यवदिति। ननु विशिष्टविविदादृष्टादि विश्वकारणमजानानां कथमियं तत्कर्त्री स्यादित्याह - भगवतीमिति।

उत्पत्तिञ्च विपत्तिञ्च भूतानामागतिंगतिम्।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति॥

इति वचनादखिलकारणादि सम्यगपरोक्षानुभवत्वात् उक्तदोषाभाव इति भाव:। ननु तथाप्यस्या एवोपादानत्वं निमित्तत्वञ्चानुमानविरुद्धम्। तथाहि -

इयमुपादानकारणं भवितुं नार्हति। निमित्त कारणत्वात्, कुलालादिवत्। निमित्तकारणं भवितुं नार्हति, उपादान कारणत्वात्, मृदादिवत् इति। तन्न। अघटमानघटनघटीय स्वेन उभयकारणत्वस्य सुशकत्वात्। ननु तथाप्यनुमानयोः किं दूषणमुक्तमित्थङ्क्य, अघटमानपटीयस्त्वेस्योपाधेरु भयत्रापि सूचितत्वात्। ननु तथाप्येवमेव विष्णोरनीश्वरत्वं प्रसज्येत इति तत्राह - अतुलतेजास इति। तुला सादृश्यं यस्य नविद्यते, तदतुलं अतुलं तेजोमहिमा यस्य स तथोक्तः।

तस्य, मायिनं तु महेश्वरं, प्रकृतिं स्वामवष्टभ्य इत्यादि श्रुति स्मृतिभिर्विष्णोः मायावशीकरणत्व श्रवणात्। अनीश्वरत्वाद्यनभिभूतमहिम्न इत्यर्थः। ननु शान्तिकर्मणिवेताळोदयोत्रभवतामापतितः। विष्ण्वादीश्वराणा मित्यनेनास्य वचसो विरुद्धत्वेन स्ववचनव्याघातप्रसङ्गादिति। तन्न। मायाकारित शरीरग्रहणस्याङ्गनाकारितलीलामालाबन्धनस्येवैतल्लीलामात्र निमित्तत्वाभिप्रायोण तद्वचसोपरुद्धत्वादिति॥

इदमत्र रहस्यम् - परां शक्तिं स्तोतुमुद्यतस्य चतुर्मुखस्य समस्तविद्यानिखिलस्य मुखारविन्दात् परशक्तिवाचकं प्रणवं निःसार विश्वेश्वरीं जगद्धात्रीं स्थिति संहार कारिणीं भगवतीमिति तस्य चतुष्कृत्वः आवर्तनं गुणैः त्रिविधा गुणातीता चेति चतुर्मूर्त्तिवाचकत्वाभिप्रायेणेति वेदितव्यम्। चत्वारईंबिभ्रमति क्षेमयन्त इति श्रुतेः। विद्याख्यमन्त्रोक्तावित्यभिप्रायेण वा। अयञ्चश्लोकः कृत्स्नस्यास्य सोत्रस्य सूत्रभूतः।

एवं चिकीर्षितप्रतिज्ञारूपया वाचा भक्तिपुरःसरं तां मनसाभिमुखीकृत्याभिष्टौति - त्वं स्वाहेत्यादिना।

ब्रह्मोवाच ॥ ७२ ॥

त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ॥ ७३ ॥

स्वाहेति स्वाहाकारः देवपूजासाधनभूतोमन्त्रः सात्वमसि, उपलक्षण मेतत्, दैविकस्य साङ्गस्य कर्मणः इदमुक्तं भवति। त्वं स्वाहारूपेण स्थित्वा देवपूजापराणामभीप्सितं स्वर्गादिफलं विदधासीति। त्वं स्वधा, स्वधेति

स्वधाकार: पितृपूजासाधनभूतो मन्त्र: उपलक्षणमेतत्। साङ्गं पैतृकं कर्मापि त्वं. एवं तद्भावेन पितृणां प्रीतिं विधाय तत्कर्तृणां सन्तत्यादि फलं वितनोषि। त्वं हि वषट्कारस्त्वरात्मिका, वषट्कारो यज्ञे सुष्ठु प्रयुक्त:. कुलिशभावेन यज्ञघ्नान् हिनस्ति। तस्य प्राणभूतो हि स्वर:, सा त्वं तदात्मिका, त्वं वैषडित्येवंरूपो हि वषट्कार:। अत्र स्वाहा स्वधारूपत्वोपन्यासेन गृहस्थस्योपलक्षणेन नित्यतया चोदितस्य पञ्चयज्ञात्मकस्य कर्मण:, ताद्रूप्यमुक्तम्। अनेनाग्नीषोमीयाद्यात्मकस्यापीति वषट्कारत्वमितिवा, स्वरात्मिका तत्तन्मन्त्रगतोदात्तानुदात्तस्वरितस्वरूपणीति च मतम्. सुधा त्वं सुधेति नागपूजातद्भावेन तत्प्रीतिं विधाय तत्पूजकानामारोग्यादि फलं वितनोषि। देव पितृ भोज्य भूत हव्यकव्यप्रसङ्गात् सुधेत्यमृतमिति केचित्। एवं कर्मकाण्डभागमाश्रितानां कर्मिणां इयमाप्यायकरीत्युक्तम्। अधुना ज्ञानकाण्डमाश्रितानां ज्ञानिनामपीयमेव नि:श्रेयसहेतुरिति प्रतिपादयति। अक्षर इत्यादिना। नित्ये अक्षरे प्रणवे ओङ्कारो हि नित्याक्षर:, वेदत्रयसारत्वात् एकवचनस्य। प्रणवस्याकारोकारमकारात्मकत्वेनाक्षरत्रयात्मकत्वेपि सन्धिकार्ये त्वैक्यात्. तत्र त्रिधा स्थिता त्रैविद्येन स्थिता। कथं। मात्रात्मिका मात्रारूपेणावस्थानस्य त्रैविध्यमित्यर्थ:। किञ्च, अर्द्धमात्रास्थिता तत्रैव बिन्दुरूपेणार्द्धमात्रा च स्थिता। बिन्दुरूपेणावस्थानं प्रकाशयितुं तां विशिनष्टि - यानुचार्याविशेषणेति। या अविशेषणां अनुच्चार्या विशेषणं ओंकार: तमपहाय पृथक्कृत्य वक्तुमशक्या एव. मकारोकारमकारात्मकस्त्रिमात्र बिन्दुसंयुक्त: ओङ्कारस्त्वमिति मुमुक्षूणां तदुपासकानां निश्रेयसफलप्रदा त्वमेवेति भाव:। तस्यानित्यत्वं नित्यं तत्वमेवैतत्वं अवयावय विभावेन इति। अथवा अक्षर समवायात्मकोहि विद्याप्रपञ्च:द्विविधा..... तानि चाक्षरणि. अचो हलश्चेति। तत्राजक्षराणि त्रिविधानि ह्रस्वदीर्घप्लुतभेदेन। तदुक्तं -

एकमात्रो भवेद्घ्रस्व: द्विमात्रो दीर्घउच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेय: व्यञ्जनस्त्वर्धमात्रकम्॥ इति ।

तत्र नित्याक्षराव्यच: तेषां नित्यत्वं हल्ष्वपि सहपाठ विवक्षया तत्र त्रैविध्येनावस्थानं हस्वदीर्घप्लुतभेदेन। अर्द्धमात्रास्थितेत्यत्रापि अक्षर इत्यनुकृष्यते। तत्र हलक्षरोऽक्षरत्वेन विवक्षित:। केवलानि हलक्षराणि

अर्द्धमात्राणि। या अविशेषणा अनुच्चार्येति। तत्र तु विशेषणं हलक्षरं तद्विना पृथगुच्चारयितुमशक्या हि, या एवं विधा हि सा एवंविधान्यक्षराणि तत्समाहारात्मकानि वेदशास्त्राण्यपि त्वामेव इति वाग्देवतात्वमुक्तम्।

प्रणवप्रसङ्गात् तदुपासनानन्तरमुपास्याया गायत्र्याश्च तदुपासनयोग्य कालत्मिकाया: ताद्रूप्यमुपपादयन् तामभिष्टौति - त्वमेवेति।

वेदजननीया गत्यन्तर्भूतानि वेदा: इति तज्जननीत्व व्यपदेश:। परा मन्त्रान्तरेभ्यो विशिष्टा त्व...। एवं सकलधर्मस्वरूपिण्या त्वया जगदेतत्सर्वं धार्यतेधत्त इति हि धर्म:। धर्मस्य लोकधारकत्वं प्रसिद्धम्। ''धर्मो विश्वस्य जगत: प्रतिष्ठा - धर्मे सर्वं प्रतिष्ठितं'' इत्यादि श्रुते:। अत्र च तस्या: ताद्रूप्यं तस्य समर्थितम्। किञ्च त्वयैतत् सृज्यते जगदिति जगत्सृष्टौ निमित्तकारणत्वमुक्तम् पाल्यत इति जगदुपादानत्वं वा।

ननु ब्रह्मविष्णुरुद्र जगत्सृष्टिस्थितिसंहारकर्तार, तत् कथमेतदित्याह - विसृष्टाविति। अत्र सृष्टिस्थितिसंहारशब्दै: तत्साधनभूतानि रज:सत्वतमांसीति त्रयोगुणा:, तदभिमानिनो ब्रह्मविष्णुरुद्रा: तै: क्रियमाणं जगत्सृष्टिरक्षासंहारलक्षणं कर्म च, त्वमेवेत्युक्तं वेदितव्यम्। तेषां तद्गुणमन्तरेण देहाद्यसंभवे तत्करणायोगादियमेव ताद्रूप्येण तत्करोतीति भाव:। सृज्यमानं पाल्यमानं संहियमाणञ्च जगत् तद्व्यतिरेकेण नास्तीत्युक्तम् जगन्मय इति संबुद्ध्या। अथ जगत्सृष्ट्यादावस्या: सामर्थ्यातिशयं वक्तुं तामनुवर्णयति - महाविद्येत्यादिना॥

महाविद्या महनीयाविद्या आत्मविद्या सा त्वमसि महामाया गुणत्रयात्मिका मूलाज्ञानरूपिणी त्वं महास्मृति:। · कल्पकोटयन्तर कालव्यवहितस्यापि अतीतवृत्तान्तस्यालोचने शक्तिर्महास्मृति:। महामेधा तात्कालिकस्य देशादिविप्रकृष्टस्य भाविनश्च वृत्तान्तस्यालोचने शक्तिर्महामेधा. महामोहा पञ्चपर्वाविद्या। अविद्याया: पञ्चपर्वाणि. तामिस्रं अन्धतामिस्रं मोहो महामोहस्तम इति। तान्येतानि पञ्चक्लेशात्मिकानि, ते च क्लेशा: अविद्या स्मितारागद्वेषादिनिवेशात्मका: एतत्सर्वं त्वमसि। अत: त्वमेव सर्वस्य प्रकृतिरिति।

अथ प्रकारान्तरेणापि तामनुवर्णयन् तस्याः सर्वेश्वरीत्वं प्रपञ्चयति - गुणत्रयविभाविनीत्यादिना। गुणत्रयं सत्वरजस्तमांसि तैरात्मानं विविधं भावयति। तत्र तामसान् भावानाह - कालरात्रिरित्यादिना श्लोकेन। अवसरेण सात्विकान् पुनरन्येन राजसान् इति क्रमात् कालरात्रिर्नाम ब्रह्मणो रात्रिः महारात्रिः ब्रह्मणोप्यवसाने कारणभूतस्य महाविष्णोः निशा मोहरात्रिः, संसारिणामामुक्तेः संसारात्मिका व्यामोहलक्षणा रात्रिरिव संसारः। अन्धेन तमसाऽऽवृतत्वात् दारुणा रात्रिः देवासुराणां रात्रिः मनुष्यादीनां इति पञ्चधा प्रोक्ता रात्रिः त्वमिति तमोगुणोल्लासः तस्याः दर्शितः। क्लेशहारिणीति तद्विशेषणेन जीवानां तस्याः तद्भावे सांसारिकदुःखस्य प्रायेणोपरमकर्त्री त्वमुक्ता। त्वं श्रीरित्यादि श्रीःसंपदधिदेवतां ईश्वरीति जगन्नियामिका काचिच्छक्तिः, ह्रीः स्वाभाविकी लज्जा, बोधलक्षणा बुद्धिः शास्त्र श्रवणसंस्कारजा बुद्धिः, लज्जा प्रतिषिद्धे कर्मणि परेण क्रियमाणे तथा तथात्मना परेण कार्यमाणे वा या मानसी ह्यनिच्छा, सा च शास्त्राभ्यासत एव भवति। पुष्टिः सुकृतपरिपाकजापरिकरसमृद्धिः, तुष्टिः यथालाभसन्तोषलक्षणा, शान्तिः मनसः प्रवि... ता, क्षान्तिः क्षमा, एते सत्वोल्लासाः।

खड्गिनीत्यादिना राजसोल्लासाः तस्या दर्शिताः। एवं कार्यविशेषापेक्षया तद्गुणोद्भावितान् मूर्तिविशेषानभिधाय स्वाभाविकीमूर्तिः कीदृशीति विवक्षायामाह - सौम्येति। त्वं अशेषसौम्येभ्यः सात्विकपदार्थेभ्यः सौम्यतरा अत्यर्थं सात्विकी सच्चिन्मयीति यावत्. सौम्या तदानीं सोमवत् प्रकृष्टप्रकाशानन्दरूपिणीति तस्याः स्वरूपलक्षणम्

परापराणां परमेति तटस्थलक्षणम्। पराणि कार्याणि अष्टप्रकृतयः। अपराणि कार्याणि षोडशविकाराः तेषां परमा तेषामपि प्रकाशयित्री परमेश्वरी तन्नियाकमका च। परे ब्रह्मादयः अपरे मन्वादयः तेषां प्राक्तनीति केचित्। अथ परमेश्वरीत्वं समर्थयन्नाह - यच्चदिति। क्वचित् देशे काले च यत्किञ्चिद्यद्वस्तु, वस्तुशब्दोऽत्र द्रव्यादिरूपेण विकल्पितस्य कार्यकारणपदार्थस्य वाचकं. यत्किञ्चिदित्यस्य विवरणं सदसद्वेति. सदितिवा असदितिवा, सदसदिति स्थूलरूपेण सूक्ष्मरूपेण स्थूलसूक्ष्मरूपेण च यद्वस्तु महदादि पृथिव्यन्तं इह यत्र क्वापि देशे काले वा संभवति, तस्य सर्वस्य

शक्तिर्या सा त्वमसि. शक्तिरसाधारणो धर्मः। साध्यसिद्ध्यनुमेयमसाधारणं सामर्थ्यं वा. तत्र कार्यानुमेयं वस्तु सदसदिति विवेकः। एवंभूता खलु त्वं अत्यन्तार्वाचीनेन स्तूयसे स्तोतुमशक्य स्वरूपैव त्वं. यतः परिच्छेद्यस्वरूपिणी भवसि. अहन्तु त्वदनुग्रह लब्धकरणकायः, अतः कथं त्वां स्तोतुं अहं शक्नुयामिति भावः। अपि च ममाप्यनुग्राहको यो विष्णुस्तस्यापि त्वमीश्वरी, अतः कथमपि त्वां स्तोतुं शक्नुयामित्याह - ययेति॥ अयं भावः - त्रिमूर्तिषु प्रधानभूतो विष्णुः, तदंशभूतावेव ब्रह्मरुद्राविति। सृष्टि स्थितिसंहारकर्ता स एव ब्रह्मरुद्रात्मना तौ करोति. स्वरूपेण स्थितिं च इति स एव सर्वेश्वरः तस्यापि निद्रापारवश्यकारिणी हि भगवती, अतः कथं त्वां स्तोतुं अहं शक्नुयामिति, अत्र सृष्ट्यादि जगत्तन्त्रस्य शरीरसापेक्षत्वात् शरीरस्य च प्रकृतिगुणोदानत्वात् प्रकृत्यधीन

मेव जगत्तन्त्रमिति त्वमेव जगदीश्वरीत्याह - विष्णुरिति॥ यया त्वया विष्णुशरीरग्रहणं कारितः, गुणत्रयात्मिका या त्वं स्वांशभूतेन सत्वगुणेन विष्णोः शरीरं निर्माय तस्मिन् तस्याहमित्यभिमानमुत्पाद्य जगत्पालने त्वं प्रवर्तयसि. तथा तदंशभूतं मामीशानञ्च त्वदंशभूताभ्यां रजस्तमोभ्यां शरीरन्निर्माय सृष्टि संहारयोः व्यामोहयसि. तथा निद्राभयक्रोधादिलक्षणां देहधर्मांश्च तेषामुद्भावयसि। अतस्त्वमेव सर्वेश्वरी तस्मात् त्वां स्तोतुं कः शक्नुयादिति. तस्मादेतावन्मात्रमेव प्रार्थयामीत्याह।

सा त्वमेतौ तु मां हन्तुमुद्यतौ मधुकैटभौ मोहय, अनयोर्बुद्धिमात्मविद्यातके कर्मण्यवतारय। किमर्थं, यतो दुराधर्षौ। अविवेकिनौ ममैव वरदानादवध्यतां प्राप्तौ इमौ, अन्यथा विष्णोरपि न निग्राह्यौ तत्सामर्थ्यञ्च तवास्त्येवेति प्रतिवादयितुं तां विशिनष्टि इत्थमुक्तप्रकारेण. प्रभावैः विष्ण्वादीनामपि मोहसंपादकैः सामर्थ्यविशेषैः युक्ता, ते च प्रभावा न हैतुकाः किन्तु स्वाभाविका इत्याह - स्वैरिति॥ आत्मीयैः आत्मनो नित्यसिद्धैः स्वरभूतैरिति यावत्, तेन तेषामप्यभिचारो दर्शितः इतरेषां प्रभावास्तु स्वोपाधिकाः, तेचोपाधिसामग्र्यनुरोधेनागमापायिनः इत्येतत् प्रभावानां लोकोत्तरत्वमनेन व्यञ्जितम्। उदारैरित्यनेन पुनस्तेषां लोकोपकारत्वमुक्तम्। एतावसुरौ इत्यनेन स्वानुग्राहिकं मामपि हन्तुमुद्यतयोरनयोर्मोहितयोर्न दोष इति व्यञ्जितम्।

किञ्च, एतावदेव मम न प्रार्थना अन्यच्च मया प्रार्थ्यत इत्याह - सुप्रबोधमिति। तत्र सुप्रबोधमितिवदता प्रायेण प्रबुद्धोसाविति व्यञ्जितम्। जगत्स्वामीति पदेन तस्मिन् प्रबुद्धे तेनैव त्वया मत्परिपालनं कार्यमिति व्यञ्जितम्। अनेन स्त्रिया अस्मद्वधो न कार्यः, पुरुषेणापि वीराग्रेसरेणैवास्मत् प्रतिस्पर्धिना केनापि वधःस्याच्चेत्तदस्मदनुमत्यामेव स्यात् इति तद्वर प्रार्थना। पुनरेतदपि प्रार्थयति - बोधश्च क्रियतामिति॥ एतौ मया वद्धयाविति. अमुष्य बोधश्च त्वमेव संपाद्य. तथा तस्मित् संपादित एव सा इमौ हन्यात्. तत्र हेतुरेताविति। तत्कर्णमलोद्भूतत्वेन तस्य पुत्रभावात् स्निग्धतरौ॥

॥ ऋषिस्वाच ॥ ८७ ॥

एवं स्तुता तदा देवी तामसी तत्र वेधसा ॥ ८९ ॥
विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ।
नेत्रास्य नासिका बाहुहृदयेभ्यस्तथोरसः ॥ ९० ॥
निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः।
उत्तस्थौ च जगन्नाथस्तया युक्तो जनार्दनः ॥ ९१ ॥
एकार्णवेऽहिशयनात्ततः स ददृशे च तौ।
मदुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ ॥ ९२ ॥
क्रोधर क्तेक्षणावत्तुं ब्रह्माणं जनितोद्यमौ।
समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः ॥ ९३ ॥
पञ्चवर्षसहस्राणि बाहुप्रहरणो विभुः।
तावप्यति बलोन्मत्तौ महा मायाविमोहितौ ॥ ९४ ॥
उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम् ॥ ९५ ॥

तत्र तस्मिन् भये संग्रामे वेधसा ब्रह्मणा एवं स्तुता ब्रह्मणो दशनि तस्थौ तस्यैव पुरतः तस्थौ किमर्थं तया तथाकृतं तत्राह -: विष्णोः प्रबोधनार्थायेति।

तदा कथं भूता सा, तामसी तमोगुणप्रधाना। तदानीं सा कुत आगतेति, तत्राह - विष्णोः नेत्रास्य नासिका बाहुहृदयेभ्यः तथोरसश्च निर्गत्य तत्र तस्थौ। तमोरूपेण तस्य निद्राकारिण्यो नेत्रादिद्वारेभ्यो निर्गम्यमाने तस्य सद्यः सुप्रबोधः स्यात् इति भानेन तत्तया तथाकृतम्। तस्य

सुप्रबोधप्रयोजनं किमित्याह - निहन्तुं मधु कैटभाविति॥ सुप्रबु द्धेनानेन मधुकैटभवधं कारयामीति तस्यास्तदानीमभिप्रायः। ब्रह्मणोपि सुप्रबुद्धेनानेनेयं तद्वधं कारयितीति। ब्रह्मणोग्रतोऽपस्थाने हेतुरव्यक्तजन्मन इति। अव्यक्तात् प्रकृतेः जन्म यस्य स तथा स्वपुत्रत्वादमुष्मिन्नमुष्याः स्नेहो विद्यते हि। तस्मात्तया तथाकृतमिति॥

अथ प्रबुद्धस्य विष्णोः प्रवृत्तिमाह - अत्तस्थाविति। एकार्णवाहिशयनादिति पूर्वशेषः। तौ दृष्ट्वा दण्डैकसाध्याविति भगवता निरूप्य निश्चयः कृतः इति प्रदर्शनार्थानि तद्विशेषणानि दुरात्माना वित्यादीनि तत्र दृष्टशंका जनको भेदोऽनयोः न प्रयोक्तव्यः इति निश्चयः। दुरात्मानावित्यनेन दृष्टशङ्काजनको भेदश्च न प्रयोक्तव्य इत्यति वीर्यपराक्रमौ इत्यनेन सामप्रयोगायोग्यत्वं, पुनः क्रोधरक्तेक्षणा वित्यनेन, अत्यन्तमूर्च्छित क्रोधे साम निष्फलं हि. उपेक्षाविषयत्वं पुनस्तौ ब्रह्माणं हन्तुं जनितोद्यमावित्यनेन दर्शितम्।

ततः समुत्थाय एवं निशिचत्य, समुत्थाय भोगिभोगतल्पादवतीर्य ताभ्यां युयुधे हरिः भगवानिति विशेषणेन शास्त्रचक्षुरसौ सहसा दण्डप्रयोगं न कुर्यादिति व्यञ्जितम्। बाहुप्रहरणो निरायुधः विभुः तथापि युद्धकुशल इति।

श्री भगवानुवाच ॥ ९६ ॥
भवेतामद्य मे तुष्टौ मम वध्यावुभावपि ॥ ९७ ॥
किमन्येन वरेणात्र एतावद्धि वृतं मया ॥ ९८ ॥

अत्र युद्धे युवयोर्युद्धयतोरिति यावत्। एतावद्धिवृतं मया वरान्तरेण प्रयोजनाभावादेतावद्धि वृता मया।

ऋषिरुवाच ॥ ९९ ॥
वञ्चिताभ्यामिति तदा सर्वमापोमयं जगत् ॥ १०० ॥
विलोक्य ताभ्यां गदितो भगवान् कमलेक्षणः।
आवां जहि न यत्रोर्वी सलिलेन परिप्लुता ॥ १०१ ॥

वञ्चिताभ्यामावाभ्याभधुनैव मुक्तेऽसौ हरिरेवं वृणुयादित्यकृतविमर्शौ महामाया विमोहितत्वात्। तदा जगत्सर्वमापोमयं विलोक्य इति। अधुनाऽनेनावयोर्युद्धच मानयोरयं वधो जले स्यात् तत्तथा माभूत्, तथासति श्रेयःसाधनं युद्धमरणं दोषावघ्रातं स्यात्। अथ तत्परिहारप्रार्थनापूर्वकं वधानुमतिः कर्तव्येति निश्चित्येति भावः।

कमलेक्षण इति। तदानीं ब्रह्मणो वरप्रदानान्यथाकरणमकृत्वा ताविमौ हन्तव्यावेव तदनुवादपुरस्सरमिति सञ्जातमनोरथतया हृदयप्रसादेन स्फुटीभूतपङ्कजसाधर्म्यलोचनः इति भावः अत्रान्तरमन्य द्भूतयमनयोरस्तीति केचित्। वध्यस्थलाभावेन हरिरेवमुच्यमानःस्वयमेव हन्यादिति चानयोरभिप्रायः श्लाघ्यः लोकप्रशस्यः. मृत्युहन्ता आवां जहि तत्र क्वचिदपेक्षास्तीत्याह - न यत्रेति। तत्र जहीति योज्यम्।

। ऋषिरुवाच ॥ १०२

तथेत्युक्त्वा भगवता शङ्खचक्रगदाभृता।
कृत्वा चक्रेण वै छिन्ने जघने शिरसी तयोः॥ १०३ ॥
एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयम्।
प्रभावमस्या देव्यास्तु भूयः शृणु वदामि ते॥ १०४ ॥

शङ्खचक्रगदाभृतेत्यनेन तस्य कारुण्यातिशयो व्यज्यते। तावन्तं कालं निरायुधः सन् युद्धचमानस्तद्वधसमये तयोः कृपया शस्त्रवधे निरस्तपापानिमौ स्यातामित्यायुधान्यनुस्मृत्याकृष्यादाय चक्रेण तावुरस्थौ कृत्या वामोरुभागे स्वप्रियतमाया भूमेः सान्निध्याभिप्रायेण तत्प्रार्थितममृतं कुर्वन् तयोः शिरासि चिच्छेदेति।

अथ विष्णोः व्यापारमुपसंहरति - कृत्वेति। विष्णोरव्यक्तजन्मन इति वदता स्वपुत्रवत्पालनीयो विधिरनयोरिति व्यञ्जितम्। सृष्टिपालनानुगुणञ्चासौ चक्र इत्याह-: तयोरिति। कलिपता स्थिरीकृता। इत्थं करीषप्रिया च कृता. अत एतद्वधं...। तस्मात् एवं कारणात् वसुन्धरा सकलधान्यक्षेत्रमापन्ना इति।

अथ तामसावतारमुपसंहतन् राजसावतारकथनाय राजानमभिमुखीकरोति - एवमिति ॥ अत्र महामाया विष्णुना मधुकैटभ वधं कारयामासेति तथैव तद्वधः कृत इत्यवगन्तव्यम् ।

विष्णो रत्र करणभावः प्रेष्यभावोवा इति मधुकैटभवधः तामसावतारकार्यम् ॥

इति देवीमाहात्म्यव्याख्यायां गूढार्थदीपिकायां
प्रथमोऽध्यायः

अथ द्वितीयोऽध्यायः॥

इत्थमुक्तोवतारोऽयं गताध्यायेन तामसः।
राजसोप्यवतारोऽयमध्यायैः त्रिभिरीर्यते॥

तत्र तावद्धेतुमाह - देवासुरमित्यादिना॥ पुरन्दरो वर्तमान इन्द्रः, तत्र युद्धे महावीर्यैः कालानुकूलाद्वीर्याधिकैः, ततः कस्मिंश्चित्काले गते सति पद्मयोनिमिति विशेषणेन तस्य सर्वजगत्कारणत्वं, तस्य च नारायणकारणत्वञ्च व्यञ्जयता इन्द्रादिभिः पुरस्करणयोगयत्वं, तस्यापि कार्यान्तरे जनार्दनसापेक्षत्वञ्च व्यञ्जितम्। अतः तत्रेत्यत्र पद्मनाभावस्थानदेशो विवक्षितः। स च श्वेतद्वीपः क्षीराब्धौ इति च गम्यते। तत्रस्थो ह्यनन्तशायी पद्मनाभ इति हि प्रसिद्धिः। यत्रेशगरुडध्वजावित्यनेन तत्र रुद्रोऽपि पद्मनाभसेवार्थमागतः. तदानीं तच्च ब्रह्मादिभिः इदानीं तस्याप्यागमनेऽव काशोऽस्तीति ब्रह्मादयोवगम्य तत्र गतवन्त इत्यवगन्तव्यम्। रुद्रेणापि सेव्यः खलु विष्णुः. विष्णोर्जातः चतुर्मुखः, तस्माज्जातो हि रुद्रः इति हि देवीं प्रति वराहवचनम्। पुराणान्ते-

वरो नारायणो देवः तस्माज्जातः चतुर्मुखः।
तस्माद्रुद्रो भवेद्देवि स च सर्वज्ञतां गतः॥ इति ।

तथाच स्वभर्तारं पार्वती ब्रह्माणं वदति वायवीये -

ललाटात् भवतोभवः इति. देवाभिभववविस्तरम् इति। आत्मपरिभवविस्तरात्मकं कथनप्रकारमाह - सूर्येत्यादिना॥ तत्तत्स्थाने स्थित्वा तत्तत्कर्मकराणमधिकारावस्थानम्, स्वयमेवेत्यनेन तस्य तपसाऽणिमादियोगात्तथा कर्तुं शक्यमिति व्यञ्जितम्। वधः वधोपायः ददृशुः साश्चर्यमपश्यन्। एतदेव विवृणोतियदभूदित्यादिना॥ तन्मुखं तस्यामुखं। याम्येनेत्यादावपि तस्या इत्येतदुत्तरश्लोकादाकर्षणीयम्। जङ्घोरुइति जङ्घा ऊरुद्वयञ्चेत्यर्थः। प्राजापत्येनेति प्रजापतयो दक्षाद्याः शिवां संपूर्णावयवां विकलाङ्गस्यामङ्गलत्वप्रसिद्धेः मुदं प्रापुः। इयमस्मद्वैरिणो हनिष्यतीति निश्चयेन मुदितानां प्रवृत्तिमाह - ततइति॥ युद्धोद्यताया आयुधदानं युज्यत इति। पिनाकधृत् शूलं ददाविति वदता शूलस्य तदायुधेषु श्रैष्ठ्यमापादितम्। विनिष्कृष्येति, ततः, तादृशमन्यत् ध्यानबलेन निस्सार्य दानवर्दनं स्वातुधश्रेष्ठं घण्टाञ्च अम्बुपतिः समुद्रः वरुण इति केचित्, तत्पक्षे विष्णुना चक्रे दत्ते मयेदानीं शङ्खो दातव्य

इति तद्ददौ। स एव पुनर्यमेन दण्डे दत्ते पाशं ददाविति।

पाशेन बध्वा दण्डेन प्रहर्तव्यमिति। प्रजापतिरिति ब्रह्मणो विशेषणम् च शब्दोऽक्षमालाञ्चेत्यत्र सम्बध्यते। तथा दिव्यमत्यन्तदिव्यं दंशनं कवचं, जलधिः शुद्धोदः, पङ्कजं लीलाकमलं, विविधानि रत्नानि च वाहनभूषणार्थं न्नाग एव हारो नागहारः तस्य महामणिविभूषितत्वं फणामणिशोभितत्वं। यद्वा नागरत्नप्रधानो हारः तस्य महामणिविभूषितत्वं नवरत्नविमिश्रितत्वम्।

अथासुराणां प्रवृत्तिमाह-: दृष्ट्वेति। अमरारयः चिक्षुरचामरादयो बलाद्धयक्षाः, आः इति कोपे, किमेतदिति शब्दविषयो वितर्कः। देवीं व्यामलोकत्रयान्वितेति वदन् देवीशब्दं निर्वक्ति - ततः दर्शनसमनन्तरमेव. जतुरङ्गबलान्वित इति। अत्र प्रकरणे यत्र संख्याय कलृप्तिः नोच्यते, तत्र तथा कथनं तदसंख्येयद्योतनार्थं, यत्र पुनरुच्येत कलृप्तिः, रथानामयुतैरित्यादिका, तत्र पुनः, एकदशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः। अर्बुदबृन्दे खर्वनिखर्व महापद्म शङ्खवत्तस्मात्। जलधिश्चन्त्यं मध्यं परा र्द्धमिति दशगुणोत्तराः संज्ञाः इत्युक्तसंख्याक्रमो द्रष्टव्टः। तत्राऽभूत् स्वयमेकत्र तस्थौ। असुरः चचार चरन्नेव तत्सैन्यं निजघानेत्यर्थः।

एतदेव दृष्टान्तेन विशदयन्नाह - वनोष्विवेति॥ युद्ध दिदृक्षूणां अन्तरिक्षस्थानामानन्दजननार्थं आम्बिकायाः प्रवृतिमाह - निश्वासानिति। युद्धमहोत्सव इति। तदानीं तद्युद्धं महोत्सवमिव दर्शनीयमासीदिति भावः। निरन्तरमविच्छेदेन रणाजिरे रणाङ्कणे, शैलानुकारिणः स्थूलतरदेहत्वात्, शिरांसि शिरः कपालानि, कबन्धाः कबन्धभूताः, युयुधुः। प्राण वियोगसमये युद्धं कुर्वन्त इव मुहूर्तमात्रं बभूवुः। ननृतुश्च नृत्तं कुर्वन्त इव बभूवुः। कबन्धाः छिन्नशिरस इति अश्छिन्नशिरस इति कबन्धस्वरूपोक्तिः। वारणासुरवाजिनां शोणितौघावहा इति सम्बन्धः असून् विचिनोति गतप्राणानादाय अमुष्माल्लोकात् परं लोकं प्रापय्य तत्र पुञ्जी चकारेत्यर्थः। अथ युद्धमध्ये एनां तुष्टुवुः स्तूयमाना देवतावर्द्धतेति प्रसिद्धेः।

एवं फलबलस्योक्तं भगवत्या निषूदनम्।
सारस्याविक्रमेणाथ महिषान्ततंदुच्यते॥

इति गूढार्थदीपिकायां द्वितीयोऽध्यायः

अथ तृतीयोऽध्याय:

निहन्यमानमित्यादि। तत् आत्मनाथचिक्षुरस्यागमने हेतु:। कोपादिति। कोपहेतु: सेनानीरिति, सेनानीत्वहेतुर्महासुर इति।

शरवर्षेण शरधारागणेन, भगवत्या मेरुश्रृङ्गसादृरयं अप्रकम्प्यत्वादिना ध्वजस्य छेद्यत्वे हेतुरतिसमुच्छृतमिति इतररथकेतुभ्योऽतितरामुन्नतत्वेन विशेषतो दृश्यमानतवात् सद्य एव तस्य तच्छेदेन परिभवप्रख्यापनेन तदीयानान्तस्य च तेजोहानिनिष्पादनार्थं सिंहमाहत्येति स्ववाहननिषूदन प्रतिचिकीर्षया पफाल भस्मी बभूव।

तत: तदानीं गजगण्डासहिष्णुतया बाहुयुद्धेन युयुधे बाहुयुद्धं चकार। तत: गजे गतप्राणे सति, प्रहारै: करप्रहारै: निपात्य चामरमिति दिङ्मयति। तत्र प्रकरणे एकैकं प्रत्यायुधविशेषप्रयोग:। सन्निकृष्टत्वदूरदेशस्थत्वादिना तेषां प्रहर्तव्यानामिति ज्ञेयम्। तत्र तत्र क्वचिश्चेत्क्वचित् केषाञ्चित्समभि व्याहाराश्चति निषूदनकालप्रकारादीनामविशेषात्। एवं सारबलविमर्दन प्रकारमुक्त्वा महिषस्यापि पराक्रमप्रकारमाह-

एवमिति॥ माहिषेण स्वरूपेणेति। स्वरूपभूतेन माहिषेण रुपेणे त्यर्थ:। श्वासानिलाहता: श्वासानिलोत्पाटिता: तद्वधाय तदा कोपमकरोदिति वदता एतावन्तं कालमियमनेन क्रीडयामासेति व्यञ्जितम्। ममैवं वपुर्माहिषमित्यनया बन्धोस्मीति परिभूयत इव मायया सिंहोऽभवत्।

तदानीं सा शिरश्चिच्छेद इति। माया परिगृहीतेन वपुषा मुहूर्तमात्रमवि पराक्रमितुमशक्नुवन् भूयोपि स्वभाविक माहिषमेव वपुरास्थित:। पूर्ववत् त्रैलोकयं क्षोभयामास। पानं मंद्य पीयत इति। उत्तमं पराक्रमविवर्द्धनं, क्षणं क्षणकालमेव, ते गर्जनमिति भाव:। एतदेवाह - मधुयावत्पिबामीति-।

त्रैलोक्यं मोहयित्वा क्रोधादतिभयङ्करं रूपमास्थायेत्यर्थ:। यद्वा, त्रैलोक्यं मोहयित्वा तदानीं त्रैलोक्यवासिभि: तद्वधप्रकारो न ज्ञात इति। तदानीं क्रोधोद्धतरूपत्वेन तस्या दुर्निरीक्षत्वात् इति भाव:। असुरैरपि

जयाशीर्वादस्तानप्यसौ सूक्ष्मेत्यप कारेपिदण्डयतीति॥

इति देवीमाहात्म्यव्याख्यायां गूढार्थदीपिकायां
तृतीयोऽध्यायः।

अथ चतुर्थोऽध्यायः

अध्यायेन चतुर्थेन देवैन्स्तुतिरथोच्यते।
महिषासुरहिंसोत्थदेवीकोपप्रशान्तये॥

ततः सुरगणा इत्यादि। ततः सर्वे सुरगणाः देव्याः स्तुतिं कर्तुमारेभिरे। महिषासुरवधानन्तरमपि देवीं क्रोधोत्कटामालक्ष्य तस्याः क्रोधं शमयित्वा प्रसादेन स्वाभिमुख्यं संपाद्य भाविना मप्यनर्थानां एवमेवोपशमनं प्रार्थनीयमस्माभिरिति निश्चित्य सर्वे देवगाणाः संहत्य देव्याः स्तुतिंकर्तुमारेभिरे। अत्र आरेभिरइति वदता प्रथमं नन्दनवनोद्यानसंपादितैः कुसुमादिभिः तां समाराद्ध्य पश्चादस्तुवन् इति द्योतितम्।

कथं स्तुतिमारब्धीवन्तइत्याह इन्द्रपुरोगमा इति॥ तदानीं देवानामिन्द्रेऽवमानावकाशः। ततः महिषासुरेण पूर्वं परिभूयमानेषु तेषु महेन्द्रः स्वयं त्रैलोक्याधिपत्येऽधिकृतोपि देवान् महिषासुरात्त्रातुं नाशकत्। तस्मात् किमनेनास्माकं प्रयोजनमिति तदुपेक्षावकाशे सत्यपि देवाः पूर्वकर्मदुरित वशादस्माकमिदं व्यसनमापातितम्।

अनेनापि पूर्वमस्माभिरिव दुष्कृतं कृतमभूच्चेति विषमां मतिमपहाय इन्द्रसान्निधिं प्राप्य, त्वमेवास्माकन्नाथ इत्युक्त्वा तं पूर्ववदेव प्रधानीकृत्याग्रतः कृत्वा देव्याः स्तुतिमारब्धवन्त इति। तत इत्युक्तं कालं विशिनष्टि-: महिषासुरे निहते इति। यद्वा महिषसुरवधानन्तरमपि देवानामिन्द्रपरिग्रहादिरूपो व्यापार आसीदिति द्योतनार्थोऽयन्तत इति।

अथ स्तुतेर्विषयवैशिष्ट्यात् कर्तृवैशिष्ट्यात् कालवैशिष्ट्याच्च सौष्ठवातिशयमुपपादयन्तः स्तुतावभिमुखास्ते तत्कृतवन्त इत्याह - शक्रादय इति। सुरगणस्तां तुष्टुवुः। सुरगणा इत्यनेन कर्तृवैशिष्ट्यमुक्तम्। स्वस्मिन् रमन्त इति सुराः, स्व आत्मा तस्मिन् रमन्त इति ज्ञानिन इति यावदिति

कोचेत्। सुष्ठु राजन्ते ज्ञानादिना प्रकाशन्त इति सुराः। अनेन कर्तृवैशिष्ट्यमुक्तम्। कर्तृवैशिष्ट्येऽपि समकालं क्रियमाणायाः स्तुतेस्तेषां भिन्नमतित्वे वाक्यभेदात् स्तुतेरहृद्याता स्यात्। नात्रैवंविधो दोष इत्याह - शक्रादय इति॥

शक्रं स्तुतिनायकं कृत्वा तेन समस्यां कारयित्वा स्वयं तत्पूरयन्तो देवाः देवीमस्तुवन्नित्येकवाक्यतया च स्तुतेः हृद्यता च प्रकाशिता। किञ्च समुचितसमयसमुपाक्रान्ततया च स्तुतेः हृद्यतरतामाह - तस्मिन् निहत इति। महिषासुरे निहते।

नन्वेकोऽसुरो निहतोऽनया किमेतावन्मात्रेणास्याः स्तोतव्यत्व मित्याशङ्कायामाह-: अतिवीर्य इति॥ वीर्याधिक्यादवद्ध्योऽसौ, तस्य वधे कृते सति तर्हि वीरहत्या दोषः स्यान्नेत्याहदुरात्मनीति। वीर्यवान् साध्वाचारः चेदवध्यः। अनेनैवंविधस्य वधे न दोषः। किन्तु उत्कर्ष एव लोकानामिति भावः।

नन्वस्य वीर्याधिक्ये तद्वधानुबन्धी महाननर्थः संभवात्तस्य वधे तेभ्यस्तदनुयायिभ्यः तद्वधानुबन्धी महाननर्थः संभवेदित्याशङ्कायां तत्परिहारोप्यनया कृतइत्याह - सुरारि बलेचेति। तदनुयायिनोप्यु पद्रवशीलान्निश्शेषं हत्वा भगवती महिषमवधीदिति भावः। इति महिषवधानन्तरमुपक्रान्तत्वाच्च येयं स्तुतिरतिचतुरेति। अपि च तां समस्तजगदीश्वरीमिति विषयसौन्दर्येण स्तुतिसौष्टवोक्तिः। प्रणतिनम्रशि रोधरांसा वाग्भिः प्रहर्षपुलकोद्भवचारुदेहाः इति। अयमर्थः देवगणा देवीं समाराद्ध्या पूरितकुसुमाञ्जलयः तां समाराद्ध्य नमस्कृत्य शिरसि बद्धाञ्जलयः परमेश्वरीस्तवोद्यताः। तत्स्वरूपानवबोधात् स्वरूपसङ्कीर्तनरूपान्देवतायाः स्तोतव्यायाः। अहो अहमहो अहमित्याश्चर्यबुद्धिजननीं वाणीस्तुतिना मधेयामाशंसमानाः कृताष्टाङ्गनमस्काराः तत्प्रसादस्फूरितपाण्यन्तस्फुरणात् सञ्जातपुळक चतुराकृतयस्ताभिः गीर्भिः तामस्तुवन्निति॥ तेषां तत्प्रसादलब्धां वाग्विभूतिं दर्शयंस्तुतिप्रकारमाह - देव्या ययेत्यादिनावन्तां अम्बिकां भक्त्या स्नेहबहुमानविश्वासात्मिकया बुद्धिवृत्त्या युक्ताः नताः स्मः प्रणामं कुर्मः।

सा नः शुभानि विदधात् प्रणामयोग्यत्वं शुभविधान सामर्थ्यञ्च साधयंस्तच्छब्दोदितां परान्देवतां विशिनष्टि। यया इदं जगत् आब्रह्म स्तम्बपर्यन्तं प्रत्यक्षदि सन्निधापितं विश्वं आत्मशक्त्या आत्मभूतयाशक्त्या चित्प्रकाशानन्दलक्षणया ततं व्यामं, तिलेषु तैलवत् काष्ठेवु कृशानुवत् मूर्त्तेष्वाकाशवच्चेति भावः।

अत्र हेतुः - देव्येति प्रकाशात्मिकया सृष्ट्यादि निदानभूतया वा। अस्या व्यामौ किं मानमित्याशङ्क्यानुमानमित्याह - निःशेषदेवगणशक्ति समूहमूर्त्त्यैति। समस्तदेवगणदेहात् गततेजःपुञ्जजातशरीराऽस्मत्समक्षमेव त्वं; अथ एतदनुमीयते इयं समस्तजगद्व्यापिनीति। एकदेशा देकदेशदर्शनं ह्यनुमानं प्रपञ्चैकदेशभूतेऽस्मद्देहव्यामिः कल्प्यैवेति भावः। व्यामौ हेतुरम्बिकामिति। जगज्जननीं मूलप्रकृतिरूपां अत एवाखिलदेवमहर्षिपूज्यां देवमहार्षिशब्देन भुक्तिमुक्ति कामोपलक्षणार्थं भुक्तिकामैः मुक्तिकामैश्च समाराद्ध्यामित्यर्थः।

विदधातु शुभानि सा नः इति प्रार्थितम्। नन्वेतदयुक्तम्। स्तुतिमुखे स्तुत्या प्रसादलाभ एव हि स्तावकैःस्तुत्या फलमर्थ्यने, तत् किमेवं क्रियत इति विवक्षायां त्रिमूर्त्तिभिरप्यरिच्छिन्न स्वरूपां भगवतीं ततोऽत्यन्तार्वाचीना वयं इन्द्रादयः कथं त्वां वर्णयाम इति वर्णयन्तः स्तुवन्ति - यस्या इति। यस्याः प्रभावं भगवान् परिपूर्णज्ञानतथा ऐश्वर्यादि गुणपरिपूर्ण इति वा. तादृशोपि अनन्तो विष्णुः, अत्र अनन्त इति विष्णोः प्रतिपदं ब्रह्मरुद्रसमभिव्याहारात्, ऐकार्थ्याच्च व्यापनशीला हि विष्णुः तस्यैवह्यानन्तवं मुख्यं, विष्णुपदपर्यायमेतत् भगवानिति प्रत्येकं सम्बध्यते विशेषणत्वेन त्रयाणामपि भगवच्छब्दव्याप्यत्वाविशेषात् "सहर्षशीर्षा पुरुष" इति श्रुतेः। अनन्तमुखो विष्णुः, चतुर्मुखो ब्रह्मा, पञ्चमुखो रुद्रश्च संहत्य सार्वकालं सर्वे मुखैर्वर्णयन्तोऽपि यस्याः प्रभावं वर्णयितुं न पर्याप्ताः समर्थाः। अत्र हेतुरतुलमिति। अपरिच्छिन्नत्वात् प्रभावस्य। न तेषां बाहुश्रुत्यानुभावात् भगवन्तो हि ते बलञ्च दुष्करकरणसामथर्यमपि तद्वत्तैः न नर्णनीयम्। तस्मात् सा उक्तरूपा चण्डिका अखिलजनपरिपालनायाऽशुभचयस्य नाशनाय च लोकपरिपन्थिनि करनिषूदनाय च इति, फलाभ्यर्थनामात्रमेवेयं कुर्महि। त्वां स्तोतुं न प्रभवामेति भावः। अशुभचयः पापसमूहो वा। अत्र मतिं

करोत्विति वदाद्भिः संकलपमात्रेणैन तस्या निग्रहानुग्रहसामर्थ्यं अनेकविभूतित्वं व्यञ्जितम्।

अथ तदेव साधयन्त स्तुवन्ति - या श्रीरित्यादिना॥

या स्वयमन्यनिरपेक्षा त्वमेव सुकृतिनां भवनेषु श्रीः पुण्यशीलानां भवनेषु गृहेषु सङ्कल्पमात्रेण संपत्प्रभावाद्वाऽत्मनां गृहेष्वलक्ष्मीः संकलपमात्रेण नाशप्रदा। कृतधियां हृदयेषु बुद्धिः कृतधियो विद्याविनयसंपन्नबुद्धयः तेषां हृदयेषु अन्तरधिष्ठाने बुद्धिः तत्तन्निश्रेयसन्निश्चयवती प्रज्ञा, सतां हृदयेषु श्रद्धा, सन्तः शुद्धित्रययुक्ताः। तदुक्तं शुद्धित्रयं - एष त्रीण्यवदातानि योनिर्विद्या च कर्म चेति। तेषां हृदयेषु श्रद्धा धर्माधर्मेषु विश्वास लक्षणाऽऽस्तिक्यबुद्धिः कुलजनप्रभवः विशिष्टकुलोद्भवः तस्य हृदये, लज्जा निषिद्धे कर्मणि जुगुप्सा. एवं सङ्कल्पमात्रेण त्वं शक्तिविशेषाश्रयणेन स्वसेवानुरूपं निग्रहानुग्रहकारिणी त्वम्। त्वामेवम्भूतां त्वं वयं नमस्कुर्महि। त्वं अस्मदुपभुक्तियोग्यभूतं विश्वं पुनीहि इति।

ननु ममेदं रूपं प्रत्यक्षमेव तद्वर्णयतु भवन्त इति। तदपि न शक्यमिति वदन्तः स्तुवन्ति। किमिति। हे देवि तव रूपं किं वर्णयामः अचिन्त्यमेतत्; तद्वर्णनमपिनशक्यमित्यर्थः यतो मनोगोचरमेव हि वाग्गोचरं भवति। तथाच श्रुतिः- "यद्धि मनसा ध्यायति तद्वाचा वदति।"

अत्र रुपस्याचिन्त्यत्वं तद्गतानां कान्तिसौष्टवादिलक्षणानां गुणानाममेयत्वादिति। किञ्च वीर्यमपि किंवर्णयामः, तदपि न वर्णनीयम्. एतावन्मात्रमेव वक्तव्यम्। अति-इतरलोक वीर्यातिशायी, भूरि - प्रचुरतरं, असुरक्षयकारि अतिभूरितिवा अत्यचिन्त्यमिति वा, वीर्यस्याप्येतावदि तीयत्तारा‍हित्यादचिन्त्यत्वेन वागगोचरता। तवाहवेषु चरितानि वा चरितान्यपि किंवर्णयामः,

तान्यपि न वर्णनीयानि, अद्भुतानि विस्मयप्रदानीत्येव वर्णनीयानि. सर्वेषु सर्वेष्वप्याहवेषु ते चरितान्यद्भुतान्येव कीदृशान्याहवानीत्याह- असुरदेवगणातिगेषु इति। असुरदेव गणोपक्रान्तेषु प्रथममसुरैरस्मा

भिर्देवैश्चारब्धानि पश्चादस्मदशक्त्या त्वयैव परिपूरितशेषाणीत्यर्थः। तवैवंविध प्रभावयुक्तत्वमुचितं। सर्वजगन्निदानभूता साक्षात्श्रीमूल प्रकृतिर्हि त्वमित्यावेदयन्तः स्तुवन्ति - हेतुरिति। त्वमाद्या प्रकृतिः श्रीमूलप्रकृतिर्हि त्वं कीदृशी प्रकृतिरिरिति तां विशिनष्टि हेतुरित्यादिना। समस्तजगतां हेतुः निदानभूता तद्विकारभूतत्वान्महदादि कार्यस्य। महदादितत्वारब्धं हि जगत् त्रिगुणापि गुणत्रयात्मिका तथापि जगद्धेतुत्वे सगुणत्वेपि देवैर्हरिहरादिभिरपि न ज्ञायते न परिच्छिद्यतेर अत्र हेतुः अपारेति। अपारत्वे हेतुः सर्वाश्रयेति विश्वोपादान भूता। एतदेवोपपादयति - अखिलमिदं जगदंशभूतमिति। अंशेभ्यः यस्याः अंशभूतेभ्यः। सत्वरजस्तमोलक्षणेभ्यः भूतं सञ्जातमिदं जगत्; यद्वा यच्छक्तिलेशोल्लासात्मकं अव्याकृता जगद्धेतुत्वेपि स्वयन्निर्विकारः; अत्र हेतुः परमेति। सर्वकार्यव्यतिरिक्ता एवं भूता प्रकृतिस्त्वमिति। एवं प्रकृतित्वेन जगदुत्पत्तिहेतुत्वमुक्त्वा संप्रति तस्यैव वृद्धिहेतुत्वेनापि सर्वाश्रयत्वं तस्या उपपादयन्तः स्तुवन्ति :- यस्या इति॥ अत्र कर्मकाण्डज्ञानकाण्डभेदेन द्विविधो हि भेदः। तत्र काण्डचोदितं कर्म द्विविधं, दैवं पित्र्यञ्चेति। तत्र कर्मकाण्डचोदितं दैवं कर्म इयमेवेत्याह-: यस्या इत्यादिना॥ यस्याः समुदीरणेन सम्यगुदीरणेन यथाविध्युदीरणेन समस्तसुरताः कृत्सनो देवतावर्गः सकलेषु मखेषु हविस्संस्था सोमसंस्था पाकसंस्थादि लक्षणेषु सा स्वाहा त्वमसि इति देवानां स्वाहारूपेण प्रीतिं विधाय यजमानस्य स्वर्गादिफल प्रदात्वमेवेत्वयावेदितम्। तत्र स्वाहाकारादि लक्षणस्य मन्त्रस्य सम्यगुच्चारणाभावे फलान्यथाभावः श्रूयते।

मन्त्रो हीनः स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह।
सवाक् वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोपराधात्॥ इति ।

उच्चार्यसे सततमेव यजमानैः स्वधा चेत्यनेन पितृप्रीणनं कर्मापि सैव तत्कर्तृणां सन्तत्यादिफलदात्रीचेति दर्शितम्। एवं कर्मकाण्डविषयभावेन दैविकपैतृकात्मना द्विधा क्रियमाणस्य कर्मणः ताद्रूप्यं तद्भावेन तत्तत्कर्मसु इज्यानां देवतानां तृप्तिकारिणी त्वं तत्कर्तृणां पुष्टिसन्तत्यादि फलदात्रीत्वेन

जगत्स्थितिहेतुत्वमस्याः समर्थितम्। धर्म एव जगत्स्थितिहेतुत्वमस्या समर्थितम्। धर्म एव जगत्स्थिति हेतुरितिहिसिद्धम्।

धर्मोविश्वस्य जगतः प्रतिष्ठा, धर्मे सर्वं प्रतिष्ठितम्'' इति श्रुतेः।
अदित्याज्ञायते वृष्टिः वृष्टेरन्नं ततः प्रजाः इति स्मृतेश्य।

अनेनैव कर्मविद्यारूपेणेयमेव संसारबन्धहेतुरिति चार्थादावेदितं भवति।

कर्मणो बन्धहेतुत्वं च प्रसिद्धम्।

''कर्मणा जायते जन्तुः कर्मणैव प्रलीयते इत्यादि दर्शनात्। तथा ज्ञानकाण्डविष्यभूता विद्यारुपेण सकलसांसारिकदुःखविध्वंसकारिणी च त्वमेवेत्यावेदयन्तः स्तुवन्ति - या मुक्तिहेतुरित्यादिना। अत्र त्वमित्येतत् विद्यासीत्यत्र योज्यम्। या एवंभूता विद्या साऽसित्वमिति सम्बन्धः। कथंभूता सा विद्येत्याशङ्कायां तां विशिनष्टि। या एवम्भूतैर्मुनिभिरभ्यस्यते, कीदृशैर्मुनिभिरित्याह - अविचिन्त्यमहाव्रतैरित्यादि॥ अविचिन्त्यमितीदृशमिति साधारणपुरुषैः स्मर्त्तुमत्यशक्यं, किमुतानुष्ठातुम्। तादृशमहाव्रतं सर्वव्रतानामपि प्रधानभूतं कौमारब्रह्मचर्यन्नाम व्रतं येषां ते तथोक्ताः।

यद्वा,
ज्ञानं च सत्यं च दमः श्रुतञ्च
अमात्सर्यं ह्रीः तितिक्षाऽनयूया।
यज्ञश्चदानं च धृतिः शमश्च
महाव्रता द्वादश ब्रह्मणस्य॥ इति ॥

सनत्सुजातेनोक्ता गुणा वा महाव्रतशब्देन गृहयन्ताम्। तथापि ब्रह्मचर्यमेवात्राभिधीयत इत्यर्थाद्भवति। एतत् गुणसमुदायरूपत्वात्त, तस्य, तथा तेनैवोक्तम्-

ज्ञानादयो द्वादश यस्य रूपमन्यानि चाङ्गानि तथा बलं च।
आचार्ययोगे फलतीति चाहुः ब्रहार्थयोगेन च ब्रह्मचर्यम्'' इति॥

बुद्धौ प्रलीने मनसि प्रचिन्त्या विद्या हि सा ब्रह्मचर्येणलभ्या'' इति

विद्यासिद्धिं प्रत्यस्य साधनत्वनिर्देशाच्च। तथाभूतै: तथासुनियतेन्द्रिय सत्वसारै: सुतरां नियतानि संयतानीन्द्रियाणि दश। सत्वसारं मनश्च येषां ते तथोक्ता: तथाभूतैश्च। अस्तसमस्तदोषै: अस्ता: निरस्ता समस्ता: दोषा: क्रोधादयो यैस्ते तथोक्ता: तथाभूतैश्च। क्रोधादयस्त्वेते विज्ञेया:! तथा चाह सनत्सुजात:-

क्रोध: कामो लोभमोहौ विवित्सा
कृपासूया मानशोकौ स्पृहा वा।
ईर्ष्या जुगुप्सा च महागुणेन
सदापवर्ज्या द्वदशैते नरेण॥

परमा विद्या आत्मविद्या "अथ परा यया तदक्षरमधिमम्यत" इति श्रुते:। अत्राविचिन्त्यमहाव्रतैरित्यादिभि: चतुर्भि: विशेषणै: मुनीनामात्मविद्याधिकार संपत्तिरुक्ता। प्रथमेन शमदमौ द्वितीयेनोपरम: तृतीयेन श्रद्धा, चरुर्थेन तितिक्षा

तथा च श्रुति:- शान्तोदान्त उपरत: तितिक्षासमाहितो भूत्वाऽत्मन्ये वात्मानं पश्येदिति, मुनय: सनकादय: साक्षान्मतित्वं तेषामेव हि।

"अक्षरं तं तु यो वेद स मुनिश्रेष्ट उच्ते" इति वच्नात्। एवं सनकादिभिरभ्यस्यमाना ब्रह्मविद्या च त्वमसीत्युक्तम्। एवं वेदप्रतिपाद्यकर्मज्ञानात्मनावतिष्ठसे त्वमिति स्तुत्वा वेदात्मना च त्वमेवावतिष्ठस इति स्तुवन्ति शब्दात्मिकेत्यादिना॥ हे देवि शब्दात्मिका शब्दब्रह्मात्मिका त्वमेव, ऋग्यजुषां साम्नाञ्च विपुलं निधानमसि विस्तीर्णमधिष्ठानमसि। शब्दब्रह्न तु सूक्ष्मप्रणवो नाद:। तथाहि वाचिकयज्ञप्रकरणे सूतसंहितायामुच्यते -

परात्परतरादस्माच्छिवाच्चैतन्यलक्षणात्।
स्वशक्तिसहितादेव द्विजा: ज्योतिर्मय: पर:॥
शब्दसूक्ष्मप्रभावेन प्रादुरासीदखण्डित:। इति।

अयं आद्य: परोमन्त्र: सुप्रसिद्ध: स्वभावत इति च।
तथा शब्दशास्त्रे चास्त्यस्य लक्षणनिर्देश:।

नैषवर्णो न वा शब्दो नचायं वा कलात्मकः।
नास्तमेति न चोदेति न शान्तो न विकारवान्॥

इत्यादि रूप एव पुनः प्राणिनां मूलाधारमनुप्रविश्य क्रमेण प्राणसंयोगात् कण्ठादिस्थानाभिव्यक्तः स्थूलप्रणव एव ओङ्कारो भवति।

यथोक्तं शबरस्वामिभिः "नाभेरुत्थितः प्राण उरसि विस्तीर्णः कण्ठे परिवृत्तो विविधान् शब्दानभिव्यनक्तीति"। अत्र प्राणस्य तु नादाभिव्यञ्जकत्वं, तदभिव्यक्तस्यैव परा पश्यन्ती मध्यमारूपस्य वर्णोपादानता। अत एव प्राणःशब्दानभिव्यनक्तीत्युक्तम्। पुनः प्रसूत इति। नादस्तु प्रसूत इत्युक्तं साम्नेन। या सा मित्रावरुण सदनादुच्चरन्तीं त्रिषष्टिं वर्णानत्र प्रकटकरणैः प्राणसङ्गात् प्रसूयते इति. अयं क्रमः उच्चारणदशायां, उद्भवदशायान्त्वन्यः नादात् बिन्दुः, तस्मादकारोकारमकाराः, तेषामेकीभाव ओङ्कारः तस्मादोङ्कारा द्व्याहृतयः, ताभ्यश्च गायत्री, तस्यास्तु, त्रयीति। श्रुतिश्च प्रणवस्य त्रयीमयत्वमाह- "यः प्रणवमधीते ससर्वमधीते, एतद्वै यजुस्त्रयीं विद्यां वाक् सन्तृणां, ओङ्कार एवेदं सर्वत इत्यादिका।"

एवं शब्दात्मिका त्वमेव वेदानामास्पदमित्युक्तम्, किं रुपाणामित्यत आह

उद्गीथरम्यपदपाठवतामिति। उद्गीथो गानं तद्वन्ति सामानि, रम्य श्रोतृणां हृदयङ्गमो देवानं रुच्यञ्च पदानां पाठः रम्यपदपाठः। तद्वन्ती ऋग्यजूंषि तथा रूपाणां; सामसु गानं हि प्रधानं, तद्वदितरत्र पदपाठ इति दर्शितम्। पदानिछन्दसामहमिति भगवद्वचनञ्चास्ति हि॥

हे देवि भगवती त्रयी भवति। एवं त्वं वेदत्रयी रूपासि। किञ्च भवभावनाय वार्त्ता त्रयी च संपद्वृद्धये त्रयी च भवति। स तु तच्छास्त्राणि वा तत्प्रवृत्तये वास्तु। वेदत्रयीनिर्देशे त्रय्नन्तरस्यापि प्रसङ्गादेवं स्तूयते। यद्वा वेदप्रतिपाद्यानि कर्माणि विभवसाध्यानि खलु अतस्तत्सिद्धये वार्ता च त्वमेवासीति स्तुवन्तीति वा सङ्गतिरस्य। सर्वजगतां परमार्तिहन्त्रि। एवं सर्गप्रकारेणापि परमार्तिः दारिद्र्यं नरकयातना वा तस्या हन्त्रि नरकयातनायाः कुम्भीपाकाद्यायाः परमार्त्तित्वं लोकसिद्धं खलु। दारिद्र्यमेव तादृशमेव नातः पापीयसीं काञ्चिदवस्थां शम्बरोऽब्रवीत्।

"यत्र नैवोद्यमः प्रातः भोजनं प्रतिदृश्यते" इति विद्वन्मतदर्शनात्।
"अभिशस्तं प्रपश्यन्ति दारिद्र्यं पार्श्वतः स्थितं" इति चास्ति वचनम्।

तस्माच्च तदनुभवसिद्धत्वाच्च त्रयीरुपेण नरकयातनायाः वार्तारूपेण दारिद्र्यस्य चेति विवेकः। एवं वेदार्थरुपेण वेदरूपेण च त्वमेव स्थितासीति स्तुतम्।

अधुना पुनः वेदवेदार्थग्राहिणी बुद्धिश्च त्वमेवेति स्तुवन्तिः मेधासीत्यातिना। मेधा बुद्धिः, तथा भूत्वा विदिताखिलशास्त्रसारा विज्ञातसकलशास्त्रतात्पर्या च त्वमेवासि मेधाविषु वर्तसे।

दुर्गासि अत एव दुर्गानामधेयासि तत्कुत इत्यत आत - दुर्गभव सागरनौरसङ्गा इति। दुर्गे केनचिदपि कथञ्चिदप्यनतिक्रमणीये सागरे संसारसमुद्रनौः, नौका पोतयानमिति तथोक्ता हेतुगर्भमेतद्विशेषणं, कथंभूता नौरित्यत आह - असङ्गेति॥ सङ्गो विघातः, वायोः प्रातिकूल्येनान भिमतदेशगमनं वा मज्जनं वा रोधो वा, तद्रहिता असङ्गा। अनेन सांयात्रिकनावोऽस्या वैधर्म्यन्दर्शितम्। तथाविधसंसारसमुद्रनौका त्वम्। अनन्यशरणानाश्रितान् सुखेन संसाराब्धेः समुत्तीर्य यथाभिलषितमभिमतं देशं वरंवदन्नयसि। तस्मात् दुर्गासि दुर्गस्थान् रक्षितुं दुर्गे पोतयानवत् स्थित त्वं दुर्गाया दुर्गात्वं, सा दुर्गेत्येवं रूपा मेधैव हि प्रज्ञा प्रासादमारुह्याशोचत् शोचतो जनात् जगति स्थानिवाद्रिस्थः सर्वतः परिपश्यतीति प्रज्ञाया दुर्गनिस्तरणसाधनत्ववचनात् प्रज्ञामेधयोरर्थान्तरत्वाभावाच्च। एवं वेदवेदार्थग्राहिणी बुद्धिश्च त्वमेव तद्रूपेण संसारिणां भोगापवर्गावपि त्वमेव करोषीत्युक्तम्।

अधुना पुनरीश्वराणां विष्ण्वादीनां याः शक्तयः श्रियाद्याः ता अपि त्वमेव तद्रूपेण तत्समीहितान्यपि त्वमेव करोषीति स्तुवन्ति। श्रीरित्यादिना। देवी श्रीर्भूत्वा कैटभारिहृदयैककृताधिवासासि श्रीरिन्द्रादिभिरभिषेकादिभिः सभाजिता देवासुरसमाजे स्वयमम्बरमालामादाय वरं वृण्वाना ब्रह्मेन्द्रादिषु सकलगुणपौष्कल्ये सत्यपि केषञ्चिद्दोषलेशानामपि संभवात्तान्विहाय श्रीः मुकुन्दमेव वरयामास। स च तदा किमस्याः सर्वोत्तरं स्थानं कल्पयामीति

निरु? स्ववक्षस्थलमेवाकल्पयत्। अत: सा तत्रैकत्रैव धिवसति तदेतद्दर्शितं हृदयैककृवाधिवासेत्यनेन। हृदयशब्दोऽत्र लक्षणया वक्षोवचन:, सामीप्यात्। यद्वा, प्रेयसीत्वात् कैटभारिमनसि प्रेमावेशेन सन्निहितेतिवा। तथा, त्वमेव गौरी भूत्वा शशिमौलि: श्री चन्द्रशेखर: श्रीमहादेव: तस्मिन् कृतप्रतिष्ठा च भवसि। प्रतिष्ठा स्थिरतरावस्थानं, प्रसिद्धं खलु तत्-

"न शिवेन विना शक्ति: न शक्त्या रहित: शिव:" इति तयोरुभयो: सम्बन्धस्य शब्दार्थयोरिव नित्यत्वात्। एतद्वचनमन्येष्वपि ब्रह्मेन्द्रादिषु तच्छक्तिरुपेणावस्थिते:, प्रदार्शकञ्च। एवं भगवत्या: प्रकृत्यादि विभूतीनामचिन्त्यवैभवानामाश्चर्यरूपाणि सर्गादि वैभवानि यथाशक्तिप्रतिपाद्य सर्वात्मत्वं प्रदर्शयन्तो देवा देवीं तुष्टुवु:।

अधुना पुन: यत्प्रसादसंपादनार्थं विभूतिविस्तारो वर्णित: तामेव महिषमर्दिनीं महामायां सर्वदेवतामयीमापन्नवत्सलतया देवरिपून्निहत्य पुरोपस्थिता, महिषमर्दनसमये प्रत्यक्षदृष्टान् प्रभावान् वर्णयन्त: स्तुवन्ति -: ईषदित्यादिना॥ तत्र देव्या: प्रसादमाकाङ्क्षमाणा: प्रसादानुभावस्य सौम्यभावस्य परमाश्चर्यतां प्रतिपादयन्ति - हे देवि, तथा, तथाभूतं वक्त्रं विलोक्यापि महिषासुरेणात्मरुषा स्वस्य रोषावेशेन, सहसा झटिति, किञ्चिदपि सन्देहं विना दर्शनसमयएव प्रहृतं प्रहार: कृत, श्रृङ्गाभ्यामुन्मथ्य पर्वता: त्वयि क्षिप्ता:, अत्यद्भुतमत्यन्तमाश्चर्यनेतत् तत्कुत इत्याशङ्कायामाहु: -

तस्मिन् समये तव वक्त्रस्यातीव सौम्यत्वादिति पूर्वार्द्धेन।

ईषत्सहासविमलं ईषन्मन्दस्मितसहितमत एव विमलं निर्मलञ्चेति तथोक्तम्। किञ्च,परिपूर्णचन्द्रबिम्बानुकारि सकल कलापरिपूर्णस्य चन्द्रस्य मण्डलमनुकरोति। कान्त्या हृद्यतया प्रसादामृतवर्षितया च तेन तुल्यतया वर्तत इति तथोच्येत। अपि च, कनकोत्तमकान्तिकान्तञ्च, कनकोत्तमं दहनच्छेदननिकर्षणादि सर्वपरीक्षायामप्येकरूपं, वस्तुतस्त पेक्षञ्च, शुद्धजाम्बूनदं तस्य कान्तिरिव कान्ति: सा कनकोत्तमकान्ति:, तया कान्तं कमनीयं, अतिमनोहरं समुज्ज्वलं दृष्टिरम्यञ्च। यद्वा, कनकोत्म कान्तीति वा पदच्छेद: अर्थ: पूर्वोक्त एव। अत एव कान्तं पूर्णचन्द्रादपि कमनीयतरमिति।

तस्मादेवंभूतस्य त्वद्वक्त्रस्य विलोकने सर्वसंहारायोद्यतानां कालान्तकसमानामपि शेषावेशेन प्रहारो न सं भवीति; प्रत्युत; अत्यन्तं शान्ततैव स्यात्। एवं सति, तथाभूतं वक्त्रं विलोक्यापि महिषासुरेण प्रत्येत्यापहृतमित्येतदत्यद्भुतमेव ध्वन्यत इति द्रष्टव्यम्। कालानलप्रतिस्पद्धर्य यीपि तद्रोषो देव्याः श्रीमन्मुखदर्शनमात्र एव यन्नाशाम्यत् तदत्यद्भुतमित्यन्यत्र प्रतिपादितम्।

तत्तु स्वानुभूतमहिषप्रतापानामितरथा न सम्भवतीति। एवं देव्याः शान्तत्वावस्थायाः परमाश्चर्यतामपि वर्णयन्ति - दृष्ट्वापीत्यादिना। हे देवि उद्यच्छशाङ्कसदृशच्छविः उद्यता चन्द्रेण सदृशशोभं तव वदनं भ्रुकुटीकराळं महिषस्य संरम्भभावेन त्रैलोक्यविक्षोभमाकलय्य झटिति कोपावेशात् भ्रुकुटीभिः कालानलज्वालायमानाभिः ललाटसिराभिः करालं भीषणोज्वलं उद्यत्प्रळयार्ककल्पं दृष्ट्वापि महिषः सद्यः प्राणान्न मुमोच यत् तदतीव चित्रं; यत्तत्तु पूर्वं तवसौम्यतादर्शनात्तस्य घोरता शमना भग्वः जनितः तस्मादप्यतीव चित्रमाश्चर्यमित्येव नः प्रतिभातीत्यर्थः। तत्कुत इत्यत आहुः- कैरिति॥

हे अम्ब अखिललोकवत्सले, कुपितान्तकदर्शनेन तत्कर्तृकेण वा तत्कर्मकेण वा, हेतौ तृतीया, तेन हेतुना, कैर्जोव्यते। अमृतपानेनैव कैश्चिदपि, ननु प्रत्युत म्रियत एव सर्वेः, एवं गते सति, तस्य जीवनं अनेन समानं खलु। तस्मात्तदतीव चित्रमेवेत्यर्थः। दृष्ट्वापीत्यत्रापिशब्देन दर्शनात् प्रागेव तव कोपसमारम्भ एवास्माकं तद्विनाशः प्रतिभात आसीदिति द्योतितम्। प्राणान्न मुमुचेत्यनेन एतद्योतितम्। त्रैलोक्यापि भस्मीभावेप्रतीयमाने

तस्य पुरोवर्तिनो महापापस्य प्राणविमोचनमात्रमपि नासीत्। न तुकेवलं भस्मीभावो नासीदित्येव न, तस्मात्तदतीव चित्रमिति। किञ्च एतदपि द्योत्यते यत् प्राणान्न मुमोच, तदेवातीव चित्रं प्रतिभाति। अन्यच्च, सर्वमास्तां, महीमर्दन, समुदक्षोभ पर्वतक्षेप, त्रैलोक्यक्षिभण गर्जनादिकस्तस्य संरम्भावेगः तद्विचित्रमिति किमुच्यते, कुपितान्तकदर्शनेन त्वेतद्योत्यते॥

"दूतस्य सन्निधावेव म्रियन्ते खलु जन्तवः"।

तथासति किंपुनस्तस्यान्तकस्य दर्शनेन सन्निधानेनेत्येव तु नोक्तम्। तदपि,

कुपितस्य दर्शनेन च तदवस्थायां ब्रह्मादिभिरपि न जीव्यते खल, तस्मादतीव चित्रमिति। एवं शान्तताया घोरतायाश्च परमाश्चर्यरूपतां प्रतिपाद्य, अधुना, तव कोपप्रसादयोः स्वभाव एवमस्माभिर्विज्ञात इति वदन्तः स्तुवन्ति - देवीत्यादिना।

हे देवि प्रसादपरमा प्रसादप्रधाना सती, भवती, सद्यः तत्क्षण एव, भवाय समृद्धये भवसि नतु कालान्तरे। यदाकदाचिदग्निष्टोमादिभिः प्रसादितानामिद्रादीनां प्रसादवत्।

तथा कोपवती सति भवती सद्य एव कुलानि कुलान्यपि निश्शेषमेव विनाशयसि, एतदस्माभिर्विज्ञातं यत्तव कोपप्रसादयोः एवंस्वभावा त्वं तत्कुत इत्यत आहुः- अधुनैवेति। अधुनैव अस्मिन्क्षण एव अनेनैव कालेन यत् यस्मात् महिषासुरस्य सुविपुलं बलं युगशतैरराधे येषान्ते तथोच्यन्ते, तथा च भवन्ति के ते इत्यात्राहुः- एषामिति॥ स्तुतिपूजादिभिः प्रसादित्तवात् प्रसन्ना सती एवं इह लोके संपद त्वत्प्रसादायत्ता एव सर्वेषां, अतः ऐहिक संपत्कामैः त्वत्पादसरोरुहमेकमेव सेवनीयमित्युक्तं भवति। किञ्च, न केवलं, तैरेव त्वत्प्रसादोऽपेक्ष्यते परलोककामैरपीत्याहुः। धर्म्याणीत्यादिना। हे देवि, सुकृती सुकृतिकारीभवति प्रसादात् धर्म्याणि धर्मादनपेतानि, कर्माणि यज्ञदानपांसि करोति। अत्यादृतः अत्यन्तमादृतः आस्तिकः प्रतिदिनञ्च, नेतरथा धनाभिजनपरिजनादि सकलसामग्र्यां सत्यामपि त्वत्प्रसादविहीनश्चेल्लोभेन वा, नास्तिकयेन वा विनाश्यमप्यतं नीतं त्वया क्षयं प्रापितं, तस्मादिति एवं सति कोपवैभवस्य विज्ञानमुपपन्नमेव खलु। अपि च, देव्याः प्रसादसिद्धकालमेव प्राप्तैश्वर्याणां देवानां प्रसादवैभवस्य विज्ञानमपि सूपपन्नमेव स्यात्। एतदनुक्तमपि सामर्थ्यदिवं भवत्येव। तस्मात् भवत्याः प्रसाद एव सर्वैरपि प्रार्थनीय इत्युक्तमभवत्। अपि च, लोके च तथैव दृश्यत इति वदन्तो देव्याः प्रसादवैभवं वर्णयन्ति - ते सम्मता इत्यादिना। सम्मताः बहुमताः, जनपदेषु तत्तद्देशेषु यत्र यत्र ते गच्छन्ति सन्ति च तत्र चेत्यर्थः।

''धनानि च भवन्तीति पूरणन्न च सीदति॥''

बन्धुवर्गः तेषामेव धन्याः सभाग्याः-। निभृतात्मज भृत्यदाराः निभृताः शान्ताः

5

पित्रादीनामिच्छानुवर्तिनः आत्मजभृत्यदारा... पायेन केनापि निमित्तेन सुकृतन्न सञ्चिनोति। किञ्च, न केवलं धर्मस्याचरणमेव त्वत्प्रसादाधीनं, फलप्राप्तिरपीत्याहुः। स्वर्गमिति। तैःधर्म्यकर्मभिः स्वर्गं प्रयाति च सुकृती भवती प्रसादात् धर्म्यकर्माचरणाद्धेतोः, न त्वन्यथा केवलकर्माचरणादेव तदपि सिद्ध्यति। तथाच श्रुतिः-

एष ह्येव साधुकर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते, एषह चेवासाधु कर्म कारयति तं यमधो निनीषते'' इति।

स्मृतेश्च -

यस्त्वहर्वृत्तिः भूतानां येन सर्वमिदं ततम्।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ इति ।

एवमेव च परामर्शकं सूत्रं फलक्रमत उपपत्तेरिति, युक्तञ्चैतसेव कर्तृणामस्वातन्त्र्यात् कर्मणामचेतनत्वाच्च परदेवताप्रसादः सर्वहेतुत्वेनेष्ट'' इति। एवं सत लाकेतीद्वयमपि त्वत्प्रसादायत्तमेवेतीति निश्चीयतामित्वाहुः - लोकेति॥ तेनेत्यत्र प्रकारेणेति तस्मादित्यर्थः।

नन्विति वाक्यालङ्कारे; समर्थितस्य सिद्धान्तस्य समीचीनता द्योतनाय। तत् तस्मादेवं परलोककामैरपि त्वत्पादसरोजमेव केवलं भजनीयमित्यत्रोक्तं भवति। अपि च, आपन्निवृत्ति कामैरावर्णैरप्यस्माभिरिव त्वत्प्रसाद एव प्रार्थनीय इति स्तुवन्ति- दुर्गे स्मृतेत्यादिना॥ दुर्गे कृच्छ्रे अत्र विशेषनिर्देशाभावाद्यत्र कुत्रचिदपिवा। संकटेपीति द्योत्यते। स्मृता तन्मात्रमेव पर्याप्तमित्यर्थः, हरसि तदानीमेव समूलमुन्मूलयसि, भीतिं अत्रापि पूर्ववदर्थः, अशेषजन्तोः न साध्वसाधु विवेकविमर्श इत्यर्थः, परमकारुणिकानामापन्नान् प्रति तन्न संभवति हि।

एवमापन्नैरपि त्वत्प्रसाद एव प्रार्थनीय इति स्तुत्वा स्वस्थैरपि तथैवेति स्तुवन्ति - स्वस्थैरिति॥ स्वस्थैरनापन्नैः किं तेषान्तेन विध्यतीत्यत आहुः - मतिमतीव शुभां ददासीति। अतीव शुभां उपर्युपरिसंपत्प्रदां

आपन्निरोधिनीं धर्मनयानुसारिणीं चेत्यर्थः आपदामभाव एव हि पुरुषार्थः। आपन्निवृत्तिस्त्वावस्थावैषम्यादेव पुरुषार्थायते। तस्मात् स्वस्थैरेव त्वमवश्यं सेवनीया इति भावः। किं बहुना त्वमिव परमकारुणिका न कदाचिदपीत्याहुः- दारिद्र्येत्यर्द्धेन॥

दारिद्र्यदुःखभयहारिणी॥ दारिद्र्यान्नैर्धन्यं, दुःखं आधिव्याधिजनितं व्यसनं, भयं भूतप्रेतपिशाचव्याघ्रगजादिनिमित्तं एतानि हन्तुं शीलमस्या विद्यत इति तथोच्यते। तत्संबोधनमेतत्- असह्यव्यसनहरणशीले, सर्वोपकारकरणाय सदार्द्रचित्ता त्वदन्या त्वत्तोऽन्या का देवता भवति, न काचिदपि। सर्वेभ्यः सर्गदा सर्वप्रकारेणाप्युपकारमेव कर्तुकार्द्रचित्ता त्वं तवैव संभवति नत्वन्यस्याः। अनर्हत्वादशक्यत्वाच्चेत्यर्थः।

ननु कथमेवं स्तुयते "सर्वोपकारकरणायेति। असुरान् प्रत्यन्यथा दर्शनात् युद्धेषु ते हन्यन्त एव खलु, अतस्तान् प्रति कठिन चित्तैवापकारित्वादिति दयाशीलताया व्यभिचारमाशङ्कमानास्तं परिहरन्तः तावेव समर्थयन्ति - एभिरित्यादिना॥ हे देवि, इति मत्वा, त्वमहिता न विनिहंसि नूनं निश्चितं कथं मत्वेति उच्यते। एभिर्हतैः जगत् सुखमुपैति, एभिरिति हेतौ तृतीया। एषु जीवत्सु जगतो दुःखमेव स्यात् सर्वोपद्रवकारित्वात् हतेषु सुखं भवेदेव, उपद्रवाभावादिति मत्वा तान् हंसि। किञ्च, एते च चिराय नरकाय पापं न कुर्वन्तु नाम। नामेति संभावननायाम्। हतानां पुनः पापाचरणन्न हि संभवेत्, जीवताञ्च तदनाचरणमपि, तस्मादेषामपि हननमवहितमिति मत्वा च हंसि। किञ्च, सङ्ग्राममृत्युमधिगम्य; इदानिं युद्धमरणं प्राप्य दिवं प्रयान्ति। इतः पूर्वं कृतानि तु पापानि यानि तेषां युद्धमरणेन प्रायश्चित्तेनैव निश्शेषमुपक्षीणत्वात् स्वर्गं गच्छान्ति च। केवलं नरकं न यान्तीत्येव, पुण्यलोकं प्राप्नुवन्त्येव। तस्मादेते मया युद्धे हन्तव्या इति मत्वा च सर्वदा कारुण्यादेवाहितानपि विर्निहंसि। शत्रुवधमपि करोषि। नतु काठिन्यादपकारबुद्ध्या, तस्मात्तान् प्रति आर्द्रचित्तैव त्वमिति भावः।

ननु मत्वेति नूनमित्युक्तं, तत्कुतस्तथानिश्चीयते न हि परबुद्धिः परेण ज्ञातुं निश्चयेन शक्यते स्वबुद्धिरेव तथा ज्ञातुं शक्यते. तस्मान्नूनमिति

निश्र्ययोक्तिः किंप्रमाण सिद्धेति चोद्यावसरे प्राप्ते; प्रमाणमाहु-ः दृष्ट्वैवेत्यादिना॥ अर्थापत्तिरत्रप्रमाणत्वेनास्वीक्रियते। अनुपपद्यमानार्थदर्शनादुपपद्य-

मानार्थपरिकल्पनं ह्यर्थापत्तिः तस्य प्रकारं दर्शयति -

हे देवि भगवति दृष्ट्वैव किन्न सर्वासुरान् भस्म प्रकरोति भस्मीकरोति न त्वशक्तेः। का दाचित्कत्वान्त समयादौ दृष्टिमात्रेण प्रपञ्चमेव भस्मीकरोषि हि त्वमिति। भावः। तर्ह्येतदौदासीन्यमिति चेत् तदपि नेत्याहुः। अरिष्टशस्त्रं प्रहिणोषि यत्, यस्मात्सुकरेणापायेन साध्येप्यर्थे दुष्करमुपायं प्रयोजयसि यस्मात्तस्मात्तव तेषां वधादन्यत्प्रयोजनं नास्तीत्यङ्गीकार्यम्। नो चेच्छस्त्रप्रयोगोऽनुपपन्नः स्यात्। प्रसिद्धं ह्येतत् - प्रयोजनमनुद्दिश्य न मन्दोपि प्रवर्तते।

चपेटा परिहारार्थं मोदकप्राप्तये तथा॥ इति

एवं सति समीक्ष्यकारिणामेवं विधा प्रवृत्तिः सुतरामेवं न संभवति, यत एवं, तस्मादनुपपद्यमानशस्त्रप्रयोगदर्शनादुपपद्यमानं प्रयोजनरूपमर्थमत्र परिकल्पनीयं, किन्तदिति निरूप्यमाणे बुद्धिमतां प्रतिभासते च तदित्यभि प्रायेण तत्प्रकारमाहुः - लोकान् प्रयान्तीत्यादिना॥ अत्र तस्मादित्यध्याहार्यम्. तस्मात् रिपवोपि कारुण्यबुद्धेरत्यन्तमयोग्या अपीति भावः।

मे शस्त्र पूता लोकान् प्रयान्तु इत्थं इत्येव साध्वी। परमकारुणिकत्वादत्यन्तमनुग्रहपरा मतिर्भवति हि भवत्येव, हिर्हेतावववधारणे इति ह्यभिधानं, न सन्देह इत्यर्थः। किञ्च अनेनाप्येषोऽर्थो विज्ञायत इति स्तुवन्तिखड्गेत्यादिना॥ यद्येवं सति तेषां दृष्टिविलयो नाभूत् तदपि भवत्याः कारुण्यमेवेत्यस्य श्लोकस्य पिण्डितार्थः।

खड्गप्रभानिकरविस्फुरणैः खड्गमुद्धृत्य तस्मिन् प्रहाराय समं धूयमाने सति तस्मादुद्भवन्तीनां प्रभाणां सविष्फुलिङ्गज्वालानां, निकराः समूहाः, तेषां विष्फुरणैः विस्फोटनैः, तथा उग्रैः तेभ्योपि घोरैः शूलाग्रकान्तिनिवहैश्च। तद्वच्छूलाग्राद्विस्फुटयनिर्गच्छद्भिः कान्तिनिवहैः तेजःपरम्पराभिश्च, असुराणां दृशो यद्विलयन्नागताः, दूरचराणामस्माकमपि दृग्विनाशभये वर्तमाने

त्वन्निकटवर्तिनां पापानामपि मरणसमयेपि दृशो यन्नाशं न प्रापुः। कीदृशानां तदिति - उच्यते - अंशुमतीन्दुखण्डयोग्याननं तवविलोकयताम्, रश्मिजालविलसितचन्द्रकलालङ्कृतं तव श्रीमन्मुखारविन्दं पश्यतां दृश इति सम्बन्धः। तदेतत् यत्पूर्वोक्तं लोकान् प्रयान्तु रिपवोपि हीत्यादिना, तदत्रैतच्छब्देन परामृश्यते। शस्त्रपूता इत्यस्य स्थाने दृष्टिपूता इति। द्रष्टव्यमत्र, तस्मादयमत्रार्थः। तदेतत् भवत्यास्तान् प्रत्येवंरूपं अनुग्रहपरत्वमेवैतत्, तन्निमित्तमेवैतदित्यर्थः। इतरथा चेत्तन्न संभवति। स्वत एव मरणसमये पापिनां स्मरणस्यापि दुर्लभत्वात्, कुतः पुनरेवं विघ्ननिवहे विद्यमानेपि त्वन्मुखसरोजदर्शनसंभवः इति। तदेवं का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्तेत्येतदुक्तिभिः समुत्थितम्।

अधुना पुनः परमकारुणिकत्वमिव सर्वेपि गुणाः त्वयीव यत्र क्वापि न सन्तीत्यावेदयन्तः स्तुवन्ति - दुर्वृत्तवृत्तशमनमिति। हेदेवि, तव शीलं स्वभावः, दुर्वृत्तवृत्तशमनं दुराचाराणां दानवादीनां दुराचारस्य प्रशमनं, तत्प्रशमनपूर्वकं तेषां सद्वृत्तत्वसंपादकमिति भावः। तदा एतद्रूपमवि चिन्त्यम्, अत्र हेतुः अतुल्यमन्यैरपीति। अयमर्थः, अस्माद्दृष्टिगोचरमपीदं रूपमपरिच्छेद्यं; अवयवन्निवेशसौष्ठवं हि रूपं, सन्निहित तत्सौष्ठव वन्तः प्रसिद्धा जनाः रतिमन्मथादयः, तथापि तेषां तत्सौष्ठवस्येयत्ता लभ्यते। इदमीदृशमिति तवरूपमियत्ता राहित्यादितरसुरूपजनातिशायि इत्येव वक्तव्यमिति।

वीर्यञ्चहन्तृहृतदेवपराक्रमाणां हन्तृवीर्यं पराक्रमः हृतदेवपराक्रमाः असुराः तेषां हन्तृ। अयमर्थः - देवाःखलु इन्द्रादयः पराक्रमादिभिर्गुणैः श्रेष्ठतमाः बहुजन्मार्जित तप आदिना लब्धवराः येऽसुराः इन्द्रादीनामपि जेतारः; तेषामपि विजये यस्यास्तव पराक्रमो लीला तस्मात्तव वीर्यमपीतरविलक्षणत्वादप्रमेय इति। तव दया तु वैरिष्वपि दौरात्म्येन द्वेष्येष्वपि इत्थं प्रकटितैव। एभिर्हतैरित्यादिना पूर्वोक्तप्रकारेण विशदन्दर्शितैव।

तथा तुल्यमन्यैरित्येतद्विशदयन्तः स्तुवन्ति केनेत्यादिना। ते अस्य पराक्रमस्य केन अन्यस्य यस्य कस्यचित्, केनपराक्रमेण उपमा भविष्यति। न कस्यचित्केनापि त्वदीयमेतत्पराक्रममुपमेयं भवति। रूपञ्च, तथा रूपमपि

अवयवसन्निविशोपि कुत्र भवति न कुत्रापि; अतस्तदपि निरुपममेवत्यर्थः तत्कुत इत्यत आह शत्रूभयकार्यतिहारिरिति। शत्रूणामत्यन्तभयङ्करं भक्तानामतिमनोहरं चैकस्यामवस्थायामिति भावः। अन्यत्र ह्यवस्थाभेदेनैव हि नान्यथा रूपमेकस्य प्रतीयते, न तु दृष्टिभेदेनैव. इह तु तथा प्रतीयत इति निरुपमत्वमित्यर्थः। कृपा च कुत्र भवति।

ननु सा त्वन्यत्रापि विद्यत इत्याशङ्कायामेवं रूपा नेत्याहुः:- समरचित्ते निष्ठुरताञ्च हित्वेति। समरनिष्ठुरतायां सत्यां तां हित्वा तया कृतं प्रतिबलत्वं हित्वेति यावत्। अतः प्रतिपत्त्येव तया सह वर्तमाना कृपा कुत्रापि नास्त्येव हि। छायाप्रभयोरिव तयोः सहावस्थानासंभवात्। देव्यां तु तदस्त्येव। तथाहि, सर्वजनमोहिनीं घोरतामवलम्ब्यावस्थिताया देव्या महिषं प्रति तत्कालसमुन्मिषितां कृपामन्तरेण स्वपादमकलेन स्पर्शः खड्गेन शिरच्छेदश्च न संभवेत्. कोपदृष्ट्या भस्मसात्करणमेव केवलमभविष्यत्। अतस्तस्यां तयोरस्त्येव सहावस्थानम्। तस्मात्सापि निरुपमेत्यर्थः।

हे वरदे एषा गुणसामग्री भुवनत्रयेपि त्वय्येव भवति। इतरत्र तु निष्प्रयोगित्वात् परस्परविरुद्धत्वाच्च। पराक्रमादिगुणानां साकल्येनावस्थि त्यसंभवादिति भावः। एवकारेण पुनःपुनः विमर्शतायपि तथैव प्रतिभातीति द्योत्यते। अहो नैसर्गिकमहामायाया वैभवमेवैतत्। त्वया प्रकटीकृतं दुर्घटघटनपटीयस्त्वमिति स्तुतमनेन। एवं परमकारुणिकायाः भगवत्याः परमानुग्रहैकरसिकत्वं बहुप्रकारमनुवर्ण्य परमानुग्रहनैपुण्यमपि विस्मयेन वदन्तो देवा देवीं नमस्कुर्वन्तिः:- त्रैलोक्यमित्यादिना॥ हे देवि ते नमः, यतः परमाश्चर्यवैभवां त्वां वर्णयितुं न वयं शक्ताः अतस्तुभ्यं वयं प्रह्वी भवामः। त्वत्पादसरोजयोरात्मसमर्पणं विदधामः, तव परमानुग्रहनैपुण्यमत्याश्चर्यमेव। एतत्त्रैलोक्यं रिपुनाशनेन त्रातं त्वया. उपद्रवकारिणामिदानीमत्यन्ताभावात्। अपि च, ते रिपुगणा अपि समरमूर्द्धनि हत्वा. दिवं स्वर्गं, नीता गमिताः, तत्प्रकारस्तु पूर्वं समर्थितः खलु। अपि च, अस्माकं उन्मदसुरारिभवं उन्मदेभ्यः सुरारिभ्यो महिषादिभ्यः समुद्भूतं भयञ्चापास्तं निरस्तं;

तेषामशेषाणां निश्शेषवधात्। अतस्ते नमोस्तु, नमस्कारेणैव प्रसादमाविष्कुर्विति भावः। एवं देवीं नमस्कृत्य रक्षां प्रार्थयन्ति -

शूलेनेत्यादिना॥ हे देवि शूलेन पाहि। उपद्रवानुपद्रवकारिणश्च समीपवर्तिनः प्रतिहत्य नो रक्ष, खड्गेन च, तथा अम्बिके, वात्सल्यादेवाखिल योगक्षेमकारिणि. तथा घण्टास्वनेन नः पाहि, चापज्यनिःस्वनेन च पाहि। अनेन दूरचरेभ्योपि हि पीडापरिहारः प्रार्थ्यत इतिद्रष्टव्यम्। पुनर्युगपदेव सर्वदिक्षु रक्षां प्रार्थयन्ति - प्राच्यामित्यादिना। भ्रामणेनात्मशूलस्येति। यत्र क्वापि वसतामस्माकं सर्वदिक्षु स्वस्य शूलं परितो भ्रामयित्वा दिग्भ्यो विदिग्भ्यो वा समागताननर्थाननर्थकारिणश्च पराहत्य नित्यं नो रक्ष। यथा ते महच्चमवकाशमलभमानाः पराहता निराशा एव निवर्तेरन् तथा नः रक्षेत्यर्थः। पुनः सर्वेभ्यो मूर्तिभ्यश्च रक्षां प्रार्थयन्ति - सौम्यानीत्यादिना सौम्यानि सात्विकानि घोराणि राजसानि अत्यन्तघोराणि तामसानि। तत्र सौम्यानि यक्षादीनि, राजसानि शूलिन्यादीनि तामसानि कालरात्र्यादीनि।

अथवा सात्विकानि सिद्धचारणादीनि, राजसानि तामसानि डाकिनी यातुधान्यादीनि, यान्येतानि त्रैलोक्ये बलिपूजादिसिध्यर्थं निग्रहानुग्रहकारिणि वर्तन्ते तैरस्मान् रक्ष। तद्विधे यानि हितानि, अतस्तैः नः पाहि। सर्वतः सर्वदा सर्वत्र च सर्वेभ्यः सर्वदिक्षु च सवङ्गिषु बहिरन्तश्चेत्यर्थः। एवं विभूतिभृन्नः पाहीति प्रार्थयित्वा, त्वत्कर पल्लवेषु वर्तमानैरेभिः खड्गादिशस्त्रैश्च नः पाहीति प्रार्थयन्ति खड्गेत्यादिना। करपल्लवसंगिनीत्यस्यायमभिप्रायः। स्वयमेव तानि भक्तरिरक्षया त्वन्नियोगमाकाङ्क्षमाणानि तव करेषु सन्निधानमिच्छन्तीति सुदर्शनवदेतान्यपि चैतन्यवन्ति खलु। तस्मादुपपन्नञ्च तत्। तथा भुवञ्च रक्ष; मानुषांस्तेषां देशांश्च रक्ष. तथा सत्येव तेषां भोगसंपदः पूर्णाः स्युः, द्यावापृथिव्योः परस्परोपकारकत्वात्, तत उक्तं तथा भुवमिति। जगतां धात्रीति सुरैरप्यर्चनीयत्वे हेतुः। स्तुत्यवसानेपि सा स्तुतिमुख इव पूजितेत्युक्तम्। अनेन स्तोत्रमुख्येनानेन स्तोत्रवरेण हेतुना तथैवाराधनेन च, आराधनं पूजाकर्म एतद्विशेषणं सुरामांसोपहारेणेति। उपह्रियन्तेनेनेत्युपहारः, पूजासाधनं, अत्र सर्वत्र हेतौ तृतीया, स्वतुष्टयतिशयस्य विशदीकरणायैतदाह - स्तोत्रेणानेनेति। ये तु मनुष्यादयः अनेन युष्माभिः कृतेन, अत्र करणे तृतीया, अर्चन्ति। मन्त्ररूपेणानेनावाहनादि कृत्वा पूजयन्ति यद्वा स्तोत्रेणार्चनं जपमात्रं तेषां भयमासन्नं विनेतास्मि नाशयिष्यामि। एवं तत्कृतस्तोत्रस्य यद्वात्सल्यांत्तज्जन वात्सल्याच्चानिष्ट

परिहारसाधनत्वमनुगृह्य इष्टप्राप्तिसाध नतामप्यनुगृह्णन्नाह - कामानिष्टान्ददामि चेति।

इष्टान् ईप्सितान्कामान् ददानि चेति। एवं भक्तवत्सला तत्कृतं स्तोत्रं पुरुषार्थसाधनत्वेनानुगृह्य तेनात्मनः स्तोतृन् अनुजिघृक्षती वदति - व्रियतामिति॥ यदिति सामान्यनिर्देशात् युष्माकमदेयं वस्तु मम किमपि नास्तीति भगवत्या व्यञ्जितम्। तेन तस्याः प्रपन्न जनवत्सलता व्यज्यते। कुतः तद्दाननिर्बन्धः त्वयैव क्रियत इति शङ्कायामाह - स्तवैरिति॥ अत्र स्तवशब्देन स्तुतिवाक्यानि विवक्षितानि, अन्यथा बहुवचनप्रयोगवैयर्थ्यं प्रसज्येत। सुपूजिता भक्तिपुरस्सरं सर्वाङ्गोपसंहारमर्चिता। अनेन स्तोत्रेण युष्माभिः कृतया पूजया संपादिता प्रीतिरेव मां वरदानाय प्रेरयति तद्यूयमभीप्सितं वृणुध्वमिति भावः। यद्यनिष्टपरिहारो वापि विवक्षितः। तर्ह्यसौ विज्ञाप्यतामित्यावेदयति पुनः कर्तव्यमिति। यच्चापरं कर्तव्य अधुना महिषवधार्थं कर्मकृतमिति तदपेक्षयापरमित्युक्तम्. महिषासुरवधादन्यच्च कर्तव्यं युष्माभिरेव, दुष्करं यत्किञ्चिदस्तिचेत् तन्निवेद्यताम्।

अथैवमुक्ता देवा ऊचुः - भगवत्या कृतमिति॥ अयं भावः। अनेनैव महिषासुरवधेन अस्मदर्थनिर्वृत्तये यत्कर्तव्यं तत्सर्वं कृतमेव। स एवह्यस्माकं सर्वार्थविघातकृत्, तस्मात् संप्रत्यनर्थनिवृत्तये कर्तव्यतरं नास्तीति व्रियतामिति यदुक्तं भगवत्या तत्प्रत्याह - यदि चापीति॥

निपातसमुदायो यद्यर्थे। अस्मासु प्रीतिप्रेरितया यया वरदाननिर्बन्धो यदि क्रियते तर्हि संस्मृता, तत्तदापत्सु तत्र तत्रास्माभिः चिन्तिता, तास्ता आपदः तदा हिंसेथाः, यथेदानीमित्यर्थः। एवं व्रियतामित्येतत् प्रत्युक्तमनेन।

अथ भगवत्या स्वयैव प्रसन्नवत्सलया स्तोत्रेणानेनेत्यादिना यदुक्तं तदेव दृढयन्तः प्रार्थयन्ति - यश्चेत्यादिना॥ वित्तस्य सुवर्णरजताद्यात्मकस्य समृद्धये परिपोषाय, तथापि भवपुत्रदारादि संपदां च वृद्धये. अत्र द्वन्द्वान्ते श्रुतस्य संपत्शब्दस्य विभवादिशब्दैः प्रत्येकं सम्बन्धो द्रष्टव्यः। अत्र विभवसंभवच्छब्देन प्रतिदिनमुपभोग्यं वस्तु कथ्यते। वृद्धिश्च तासां क्रमेणोत्कर्षः। तस्यै त्वं सुप्रसन्ना भवेथाः इत्यर्थः। सर्वदा कालविशेषमनपेक्ष्य

इत्युक्तम्। अनेन मर्त्य इत्यनेन, पुरुषविशेषानपेक्षा ताभ्यामेव देशविशेषानपेक्षा कार्येनि व्यञ्जितम्।

अथ भगवत्याः प्रवृत्तिमाह - इति जगतोऽर्थे, यश्च मर्त्त्य इत्यादिना। आत्मनोऽर्थे यदि चापीत्यादिना प्रदर्शितरूपे, अत्र

तादर्थ्ये निमित्तपञ्चमी पर्यवस्यति। इति प्रसादितेत्यत्र इति शब्देन तत्कृतस्तुतिप्रकारः परामृश्यते। तथेत्युक्त्वा तदुभयं तथा भवतु इत्युक्त्वाऽनुगृह्याऽन्तर्हिता भद्रकाळी भद्राणि मङ्गलानि कलयतीति. कलबन्धन इति धातुः। भक्तानामभिमतपुरुषार्थप्रदेत्यर्थः। अथ राजसावतारमुपसंहरति - इत्येतदिति। एतच्छब्देन संभवप्रकार उक्तः। अथ सात्विकावतारं प्रस्तौति पुनरिति। दुष्टदैत्यानान्धूम्रलोचनादीनां तदा सुम्भनिसुम्भयोः तत्स्वामिभूतयोश्च; तच्छृणुष्व तत्प्रकारं श्रृणुष्व॥

इति देवीमाहात्म्य व्याख्यायां

चतुर्थोऽध्यायः

॥ अथ पञ्चमोऽध्यायः ॥

अवतारः त्रिभिः प्रोक्तः राजसः प्रकृतेरिति।
पञ्चाद्यैरथाघ्यायैः सात्विकः प्रतिपाद्यते॥

तत्र तावत्तत्कारणमाह - पुरेति, घोरदर्शनाविति। घोरं दर्शनमभिप्रायो ययोस्तौ, तथा। अयं भावः - इह पुरा शुम्भनिशुम्भाख्यौ द्वावसुरौ बभूवतुः। तौ शैशव एव इन्द्रेण स्पर्धमानौ तद्विजिगीषया आवाभ्यां किं कर्तव्यमिति विचिन्त्य तपश्चरितव्यमिति निश्चयं चक्रतुः।

"नाऽसाध्यं तपसा किञ्चित् त्रिषु लोकेषु विद्यते"

इति स्मरणादिति निश्चित्य पुनरिन्द्रं विजित्य त्रैलोक्याधिपत्यमात्मनः संपादयितुमिच्छन्तौ तदर्थं वीर्योत्साहादिकं संपाद्य, तपसा ब्रह्माणं तोषयित्वा

वरान् लब्ध्वा अवध्यतामापादयितुं शैशवे तपश्चेरतु:। कीदृशं तप इत्यत्रोक्तं उत्तममिति। घोराभिप्रायसाधनक्षमत्वमन्यैरसुकरत्वञ्च तस्योत्तमत्वम्। तदेवाह - वर्षाणामिति॥ वर्षाणामयुतं, अत्यन्तसंयोगे द्वितीया। दिव्यमिति तपोविशेषणम्.

विस्मापनप्रमदाश्चर्यबुद्धिजननम्। अत्र तपस: पञ्चधाश्चर्यबुद्धि जनकत्वं कर्तृतो, देशत:, कालत:, प्रकारत:, फलतश्चेति। तत्र प्राप्तयौवनावेवेत्यनेन कर्तृत: तस्य तथाविधत्वं दर्शितम्। वर्षाणामयुतमिति कालत:। पुष्कर इति देशत:। तथा च तन्महिमा श्रूयते -

दुष्करं पुष्करं गन्तुं दुष्करं पुष्करे तप:।
दुष्करं पुष्करे दानं वस्तुं चैव सुदुष्करम् ॥ इति ॥

निराहाराविति प्रकारत:। घोरदर्शनाविति फलत:। अत्रैतच्छ्लोकद्वय मेकवाक्यम्। तत: वर्षायुते पूर्णे ब्रह्मा प्रसन्न: तयो: मनोऽभिलषितान् कामान् ददौ। तयोरीप्सितान् अनुत्तमान् अतिदुर्लभान् तद्दानसामर्थ्यद्योतकं विशेषणं - भगवानिति॥ लोकपितामह इति पुनर्विशेषणेनासुराणामप्यनुग्रहोऽनेन कर्तव्य इति द्योत्यते। तत्र ते च वरादेव मनुष्यादिभिरावयो: वधो न भूयादित्यादिरूपा इत्यवगन्तव्यम्। तथाच वायवीये

"अवध्यत्वं जगत्यस्मिन् पुरुषैरखिलरपि" इत्यादि॥

तत: वरलाभानन्तरमेव, मदबलाश्रयात्मदप्रधानं बलं मदबलं यद्वा, मदो बलञ्च मदबलं द्वन्द्वैकवद्भाव:। तदा श्रयादिति हेतौ पञ्चमी। वरबलाश्रयादिति केचित्पठन्ति। तत्र वरलाभेन लब्धं बलमाश्रित्येत्यर्थ:। न केवलमिन्द्रस्यैवाधिपत्यं हृतं, अन्येषाञ्चेत्याह - तावेवेति॥ तावेव सूर्यताञ्चक्राते सूर्यस्याधिकारमप्यपहृतवन्तावित्यर्थ:। पवनर्द्धिञ्चक्रतुरिति॥ आत्माधीनं चक्रुरित्यर्थ:। तत: एतान् जित्वा पश्चादन्ये च सर्वे स्वस्थानात् प्रच्याविता:। किञ्चेत्याह - इन्द्र इति। भ्रष्टराज्य: इन्द्र:, तस्मात् पराजित: स्वपदाच्यावित:। तस्मात् स्वर्गलोकात् विनिर्धूतश्च। न केवलं इन्द्र इत्याह हृताधिकारा इति। त्रिदशा सूर्योदयेऽन्ये च सर्वैर्निराकृता: स्वर्गाद्विनिर्धूता

इति अयमर्थः - वरलाभानन्तरं सुम्भनिसुम्भौ बलोद्रिक्तौ स्वर्गलोकं प्राप्य युद्धसन्नाहमात्रेण अमरावत्या इन्द्रं प्रच्याव्य, अन्यानपि सूर्यादींश्च अपरांश्च सर्वानित्र तत्संबन्धिनः तत्स्थानात् प्रच्याव्य स्वर्गलोकेप्येतैर्न स्थातव्यमिति भेरीघोषेण तत्र तेषां सञ्चरणमपि न्यरुणदिति॥

तत्र शच्यान्वित इति इन्द्रविशेषणेन स तया सह कथञ्चिन्निष्क्रान्त इति द्योतितम्। तत्रेन्द्रस्य तदानीमस्याप्यनयोः

"इन्द्राणीमासुनारिषु सुभगामहमश्रवं" इति प्रसिद्ध्या तयोः तदभिलाषा शङ्कया भीतःसन् स्वयं तामादय निष्क्रान्त इति द्योतितम्।

अथ विजितसुरलोकस्य प्रवृत्तिमाह - तेष्वित्यादिना। अथ तेषु तेषु धिष्ण्येषु इन्द्रचन्द्रादिस्थानेषु लोकेषु च स्थाने वा स्वाधीनान् स्वजात्यानेव प्रथितान् वीर्यशौर्यादिना प्रसिद्धान्, रत्नबीजादीन्ययोजयत्। अयमर्थः-

इन्द्रादीन् विजित्य त्रैलोक्यं वशमानीय तत्रैकैकमेकैकस्य लोकस्य नायकं कृत्वा तेषु च तत्रैकैकस्मिन्धिष्ण्ये तत्रैकैकं नायकं कृत्वा स तान् सर्वान् धिष्ण्यान् तत्तल्लोकपालाधीनान् कृत्वा तत्सहितान् सर्वान् लोकपालान् आत्मविधेयान् कृत्वा स्वयं समस्तलोकानां धिष्ण्यानाञ्च नायको भूत्वा यौवराज्ये निसुम्भञ्च संस्थाप्य स्वयममरावत्यामवस्थितोऽभवदिति॥

अथ तदवधूतानां देवानां प्रवृत्तिमाह - ततो देवा इति। ततः पराजयानन्तरं देवाः सूर्यसोमादयः इन्द्रेण मानुषीं तनु बिभ्राणाः, अत एव कृशाधमनी सन्तता अवनौ चेरुः। कियन्तं कालं तथा चेरुः इत्यत्राह - एव... ति॥ तत्र तस्या भूमौ अमितद्युते इति संबुद्ध्या देवैरपि ईदृशं व्यसनमनुभूतं, तस्मात् त्वया खेदो न कार्यः। तदेवं व्यसनं अतितुच्छमेव इति द्योतितम्। तत एवमतिकाले गते सति देवाः मनुष्यशरीरमवलम्ब्य क्वचित्क्वचिद्वर्तमानाः सह एकस्मिन् देशे समयं कृत्वा संहत्य, पुनरिन्द्रेण समेत्य इन्द्रञ्चान्विष्य तेन संविदं कृत्वा ब्रह्मणा च समेत्य तत्र दुर्गां भगवतीमपराजितां संस्मरन्ति, अस्माकमेतदापन्निर्वृत्तौ दुर्गैव शरणमित्यनुस्मरन्नित्यर्थः। एवं सुंभस्य पुण्यक्षये संप्रामे सति, स्वापत्काले गतप्राये सति ते स्वानुग्रहकारिणीं भगवतीमस्मरन्निति भावः।

स्मरणप्रकारमाह - तयेत्यादिना यथावदित्यस्य नाशयिष्यामीत्यनेन सम्बन्धः इति मतिं कृत्वा भगवतीस्मरणमेवापद्विमुक्तिसाधनं निश्चित्येत्यर्थः। हिमवद्गमने हेतुः नगोत्तममिति। तत्र तस्यां स्मर्यमाणायां सा शीघ्रं प्रसादं प्राप्नयात्, तत्र

तस्याः सान्निद्धयातिशयात्। तस्या लीलाविग्रहस्य निदानभूतो हि सः इति तत्र जग्मुः। ततो देवीं तुष्टुवुः। तत्र गत्वा तत्र गङ्गाम्भसि स्नात्वा कुसुमादिना तां समाराद्धय पुनस्तुष्टुवुरिति द्योतितम्। तत इत्यनेन तत्र दुर्गां संस्मरन्ति। विष्णुमायां प्रतुष्टुवुरित्युक्तम्। उपरि च शरीरकोशतश्चास्या इति भगवत्याः प्रादुर्भावं वक्ष्यति। तेनेदमत्र द्योतितम् -

परमार्थतस्तु हरिहरयोः न भेदः। तद्वदुमा रमयोरपि॥ तत्र निष्क्रियस्यात्मनो गुणत्रयरूपिणि सर्गादिजगन्निर्वाह निदानभूता शक्तिरेव पार्वती दुर्गा लक्ष्मीमयित्यादिभिः शब्दैरुच्यते - तत्र तस्या अपि नात्मनोऽत्यन्त भेदः, चन्द्रचन्द्रिकयोरिव इत्यादि सर्वं द्रष्टव्यम्।

अतो न केनचित् कस्यचिद्विरोधः। तेषां स्तुतिप्रकारमाह - नम इत्यादिना। तत्र स्तुतिवचनस्य नमस्कारप्राधान्यं शीघ्रप्रसादार्थम्। अत्र, यत्र नमः शब्दो नास्ति तत्रानुकर्षणीयम्। देव्यै नमः। देवो विष्णुः तस्य देवी विष्णुमायाख्या तस्यै नमः। महादेव्यै नमः, सैव पुनः महादेवी महादेवशक्तिरूपिणी महादेवस्य शक्त्यात्मना वर्तमाना या

तस्यै नमः। शिवायै - शिवशब्देन अनवच्छिन्नं सुखमुच्यते, तद्रूपिण्यै नमः। महादेव्यै नमः। सैव पुनर्महादेवस्य शक्तिरूपिणी महादेवस्य शक्त्यात्मना वर्तमाना या तस्यै नमः। शिवायै नमः इति पुनरन्वयः।

नमः प्रकृत्यै प्रकृतिःगुणसाम्यं, तद्रूपिण्यै नमः। नियताः प्रणताः स्म तामिति। तामुपाधिभेदेनानेकरूपिणीं इमां नियताः प्रह्वीभूतबाह्याभ्यन्तःकरणाः प्रणताःस्म तां प्रत्यष्टाङ्गनमस्कारं कुर्म इत्यर्थः। रौद्रा तमोगुणप्रधाण, गौरी रजस्तमोमिश्रा, धात्री जगदाधारभूता, कल्याणी मङ्गलप्रदा। शर्वाणी गिरिजारूपिणी, ख्यातिः सात्विकी, धूम्रा राजसी, कृष्णा तामसी, अतिसौम्या केवलसात्विकी, अतिरौद्रा केवला तामसी जगत्प्रतिष्ठा जगदवष्टम्भभूता, भूतिः लक्ष्मीः॥

अथोपाधिविभिन्नानं विभूतीनां विवेचनं एस्मिन्नेव वचने कबलीकृत्य निर्जरा: स्तुवन्ति. अथ कयाचित्तु वाक्यभङ्ग्या महेश्वरीं यादेवीत्यादिभि: श्लोकै: तत्रास्माकं क्रमोऽयम् -

माया बुद्धि: चेतना च बुद्धि: विद्या स्मृतिस्तथा।
श्रद्धा स्वाहा स्वधा चैव पुष्टि: तुष्टि: दया धृति:॥
अत्र पञ्चनमस्कारवचनानीह यानि वै।
तेषां विषयभेदेन सार्थकत्वमिहेष्यते॥

कथं तदिति चेदत्र तत्प्रकारोऽवधार्यताम् -

गुणत्रयात्मिका माया विष्णोरेषा सनातनी।
तमो रजश्च सत्वञ्चेत्येवमस्या गुणास्त्रय:॥
गुणभेदाच्च सा माया त्रिधा कार्यानुरोधत:।
कार्यमत्र सुषुप्तिश्च स्वप्नो जाग्रदिति त्रिधा॥
सुषुप्तिस्तु तम:कार्यं रजस: स्वप्न उच्यते।
जाग्रत् सत्वस्य कार्यं स्यात् इत्यवस्था त्रयं विदु:॥
सुषुप्तिं कुर्वती यातु विष्णोर्माया नृषु स्थिता।
तस्यै तामसरूपिण्यै नमस्तद्वा हृति स्थिता॥
या रजो गुणमाश्रित्य नृणां स्वप्नकरी सदा।
तस्यै नमस्तथा सत्वगुणमाश्रित्य देहिनाम्॥
जाग्रत्प्रवर्तनीया च तस्यै चापि नमस्तथा।
गुणत्रयात्मिका या च तस्यै प्रकृतये नम:॥
गुणातीता च या संविद तस्यै नम इति क्रम:।
अत्र सर्वत्र विज्ञेय: तत्र प्रकृतिगोचरा॥
नम: स्त्रियेह सर्वत्र तथेऽयं संविदाश्रया।
क्रियते तु तयोरत्र प्राधान्यमिति गृह्यताम्॥
तथा शक्तस्त्रिधा प्रोक्त तद्वदेव मनीषिभि:।
शक्तिर्मूर्तिरिह प्रोक्ता काळरात्र्यादि लक्षणा।
तामसीमूर्तिरुदिता चामुण्डाद्या तु राजसी।
सात्विकी कमलाद्या तु तत् त्रैविध्यमितीरितम्॥

चेतनानामचैतन्यं नृषु सामर्थ्यलक्षणम्।
सर्वोपद्रवशीला तु तामसी चेतना स्मृता॥
स्वप्रतिस्पर्धिहननस्वभावा राजसी पुनः।
सात्विकीत्वविशेषेण सर्वानुग्रहकारिणी॥
बुद्धिश्च त्रिविधा ज्ञेया तत्र चौर्यादि गोचरा।
तामसी राजसीत्वर्थकामशौर्यादि गोचरा॥
सात्विकी शुद्धधर्मादि गोचरेयमिति त्रिधा।
विद्या च त्रिविधा ज्ञेया नृत्तगीतादि गोचरा॥
तामसी राजसीचेयं दण्डनीत्यादि गोचरा।
अध्यात्मगोचरा विद्या सात्विकीयमिति त्रिधा॥
स्मृतिश्च त्रिविधा ज्ञेया ह्यपकारैकगोचरा।
तामसी राजसी तद्वदुपकारापकारयोः॥
उपकारैरविषया सात्विकी त्रिविधा च सा।
आस्तिक्यबुद्धिः श्रद्धोक्ता गुणभेदात् त्रिधा च सा॥
ऐहिकैकफलोपायगोचरा तामसी स्मृता।
पारत्रिकानुरोधेन तद्गता सैव राजसी॥

पारत्रिकैकविषया सात्विकी सैव सम्मता।
स्वाहा च त्रिविधा ज्ञेया देवताराधनात्मिका॥
सर्वात्मना ह्यशुद्धा तु तामसी परिकीर्तिता।
प्रायेण शुद्धिसंयुक्ता राजसी परिकीर्तिता॥

सर्वात्मनैव शुद्धा तु सात्विकी त्रिविधा च सा।
द्रव्यं कर्म च कर्ता च कालश्चेत्येवमादयः॥
त... सिद्धिहेतवो ह्यर्थाः शुद्ध्यशुद्धी च तद्गते।
इत्थं पितृक्रियायां च त्रैविध्यं संप्रदर्शितम्॥
पितृक्रियेह गदिता स्वधाशब्देन पण्डितैः।
पुष्टिञ्च त्रिविधा ज्ञेया गुणभेदेन पण्डितैः॥
तत्र चौर्यादिना सिद्धा तामसी परिकीर्तिता।
काम्यकर्मोद्भवा तत्र राजसी पुष्टिरुच्यते॥
समत्वेन स्थितस्यास्य या पुष्टिः पूर्वकर्मणा।

स्वधर्मस्याविरोधेन सात्त्विकीं तां विदुर्बुधाः॥
तुष्टिश्च त्रिविधा ज्ञेया पुरुषाणां गुणोद्भवा।
अन्यायेनापि लब्धेऽर्थे या तुष्टिः सा हि तामसी॥

न्यायतस्त्वत्प्रयासेन लब्धेऽर्थे राजसी स्मृता
अल्पे महति वाप्यर्थे समबुद्धेरयत्नतः॥
लब्धे या जायते प्रीतिः तुष्टिः सा सात्त्विकी स्मृता।
दया च त्रिविधा ज्ञेया तत्र चोरादि गोचरा॥
तामसीति समाख्याता राजस्यात्मीयगोचरा।
अविशेषेण सर्वेषु स्थिता सा सात्त्विकी स्मृता॥
धृतिश्च त्रिविधा ज्ञेया शिश्नोदरजयो धृतिः।
राज्ञो भयात्समुत्पन्ना धृतिः या सा तु तामसी॥

लोकापवादशङ्कोत्था राजसी परिकीर्तिता।
अदृष्टदोषशंकोत्था सात्त्विकी धृतिरुच्यते॥

या अखिलेषु भूतेषु सुरनरतिर्यगादि प्राणिषु इन्द्रियाणां तदाधाराणां इन्द्रियाणाञ्चक्षुरादीनां भूतानाञ्च तदुपादानभूतानां पृथिव्यादीनां च अधिष्ठात्री निदानभूता, तस्यै व्याप्त्यै सर्वोपादानभूततया सर्वव्यापिन्यै ते नमोनमः। तत्र नमोनम इति द्वयोः इन्द्रियाधिष्ठात्री भूताधिष्ठात्री च विषयौ। अत्राखिलशब्देन गुणभेदात् भूतानां त्रैविध्यमर्थादाख्यातं भवति।

तौ तदधिष्ठात्र्या अपि तद्द्वारा त्रैविध्यामित्यत्रापि पूर्ववत् पञ्चप्रकार ऊन्नेयः। तत्र तत्र भूतानामिन्द्रियाणां च पञ्चविधत्वात्तदुपाधिकं पञ्चविधत्वं च तासामपि प्रत्येकं नमस्क्रियाविषयत्वञ्च द्रष्टव्यम्॥

चितिश्च त्रिविधा ज्ञेया चितिस्तनुरिहोच्यते।
पापकर्मैकसंसिद्धा तामसीचितिरुच्यते॥
मिश्रकर्मसमुद्भूता राजसी चितिरीरिता।
पुण्यकर्मैकसंसिद्धा सात्त्विकी सा निगद्यते॥
चितिर्ज्ञानमिति प्राज्ञा इह केचित् प्रचक्षते।
त्रैविध्यं तत्र चोन्नेयं शेषमत्रापि पूर्ववत्॥

इत्थं नमस्क्रियां कृत्वा प्रार्थयन्त्यमरा पुनः।
वदन्तो भक्तवात्सल्यं भगवत्या अभीप्सितम्॥

तत्र तावत् पूर्वकृतमुपकारमनुस्मरन्तः प्रार्थयन्ति - या संस्तुतेति॥ पूर्वं महिषवधानन्तरं तथा पूर्वोक्तप्रकारेण अथ तस्या भक्तवात्सल्यं प्रकटयन्तः प्रार्थयन्ति - या संस्मृतेति॥ अथ स्वावस्थां निवेदयन्तः प्रार्थयन्ति - या सांप्रतमिति॥ अत्र शुभानि भद्राणीत्यत्र विशेषणं भद्राणां शुभत्वममङ्गललेशराहित्येन हृद्यतरत्वम्। इष्टप्राप्तिमनिष्टपरिहारं चास्माकं सा विदध्यादिति वाक्यार्थः। शुभहेतुरिति। तस्याः शुभहेतुत्वं धर्म्याणीत्यादिना पुरस्तात्समर्थितम्। अथ देवानां स्तुतिः सफलासीदिति वक्तुमुपक्रमते - एवमिति॥ अत्र भवद्भिः का सुभ्रूः स्तूयते। अत्राप्येवमित्यनुकृष्याब्रवीदिति क्रियया योज्यम्। अनवरतमेव नमस्तस्यै नमस्तस्यै इति स्त्रीलिङ्गनिर्देशात्काचित् स्तूयत इति गम्यते। सा सुभ्रूः वनितोत्तमा का, तां मे वदतेत्यर्थः।

अथैवं पृष्ठा देवाः कथमिदानीमस्माभिः प्रतिवक्तव्यमिति सन्दिहाना व्यामुह्यन्तः। अथ तथापि यांस्तान् दृष्ट्वा परमकारुणिका परमेश्वरी सर्वव्यापिनी पराशक्तिः। किं मदंशभूता त्वं शशिशेखरवल्लभात्वाभिमानेन जानासि वाऽमून् पृच्छसि इति पृच्छन्तीव तस्या एव अपिस्वरूपबोधमाविष्कृतवती अस्याः शरीरकोशतः समुद्भूताब्रीवीत्। अत्र शिवाशब्देन सर्वजगदीश्वरी सत्वप्रधाना पराशक्तिरुच्यते। अत्र तच्छरीरस्य कोशत्वारोपणाविर्भूतायाः सारतरत्वद्योतनार्थम्। यथा कोशात्खड्गः सारतरः, किञ्च विकोधितः खड्गो यथा तैक्ष्ण्येन स्वाधारावलग्नं निकृन्तति, तद्वदियमपि सर्वासु निकृन्तनशीलेति चानेन ध्वन्यते. अपि च, अवकृष्टकृपाणः कोशो यथा विच्छायो भवति, तस्यां समुद्भूतायामेतद्वपुरपि विच्छायमभूदिति द्योतितमनेन। एकद्यात्रैवोपरि तस्यामित्यादिना स्फुटीक्रियते। अथ तत्प्रतिवचनप्रकारमाह - स्तोत्रमित्यादिना। देवैः ममैतत्स्तोत्रं क्रियते मत्संबन्ध्येतत्स्तोत्रं क्रियते. माममी देवास्तुवन्तीत्यर्थः। तत्र हेतुः शुम्भदैत्यनिराकृतेरिति समरे निसुंभेन पराजितैरिति।

ननु पूर्वमुक्तं, विना युद्धेनेति, अत्रैवं च, कथमेतद्घटते। उच्यते। पूर्वं देवानां स्वस्थानान्निर्गमनसमये किञ्चिद्युद्धमासीदिति। वक्तुं नालमिति

पूर्वं विनायुद्धेनेत्युक्तम्। अधुना पुन: भगवत्या अत: परमपि तद्युद्धमङ्गीकृत्य कथ्यते। देवानां लाघवपरिहाराय, अन्यथा केचिद्वदन्ति। निसुम्भेन युद्धस्योद्योग: कृत: तावतैव देवा: पराजिता इति। अब्रवीदित्य स्योत्तरश्लोकगतमिति शब्दमध्याहृत्येत्यब्रवीदिति योजनीयम्। शरीरकोशादित्यादि। अत्र यदिति यस्मादर्थे ततस्तस्मात्, अथ पार्वत्या: प्रवृत्तिमाह - तस्यामित्यादिना। कौशिकीप्रादुर्भावानन्तरं सत्वगुणस्य प्रायेणाकृष्टत्वात् कालिमां प्रामां सा स्नात्वा गङ्गाम्भसि गङ्गाधरसन्निधिमुपगता, तदा, स हरिणाङ्कशेखर: कालाम्भोधर कान्तिं कान्तामालोक्य नर्महासं कुर्वन् कालिकेति समाचरत्यौ, तदा सा प्रणयापायकातरा तत्राश्रमं परिकल्प्य स्वपूर्ववर्णोपलब्धये तपश्चचारेत्ययमर्थोऽस्मिन् सन्दर्भे गर्भित: इति। अन्यथा केचिदाहु: यथा प्रादुर्भूताया: कौशिकीति नाम निर्वृत्तं तथाऽमुष्या: पार्वत्या: कालिकेति समाख्या समजनीति। अथ कौशिक्या: प्रवृत्तिमाह - तत इति।

वरं सर्वलोकोत्तरं, अत्र हेतु: सुमनोहरम् इति, अस्या मनोहरत्वलक्षणस्य रूपगुणस्येयत्ता नास्ति। इतरस्य तु तद्विद्येत एवेति लोकोत्तरत्वमस्येति भाव:। महावीर्यौ युष्माकमवद्ध्यौ, वरलाभात् हन्तास्मीत्युक्त्वा अहं हनिष्यामीत्युक्त्वा हिमवच्छृङ्गं प्रतस्थे।

कुत्र स्थित्वा तद्वधावकाश: प्रतीक्षितव्य इति चिन्तयत्यस्यैव हिमवत: शिखरे तत्कर्तव्यमिति तत्र प्रतस्थे। सुखवासोपि विवक्षितसिद्धिश्च तत्र सुकर इति वक्तुं तं विशिनष्टिसिद्धचारणसेवितमित्यादिना सिद्धचरणा देवयोनिविशेषा:

अथ देवा: किं चक्रुरिति विवक्षायामाह - तत इति। जग्मु: स्वाभिमतदेशमिति सिद्ध्यति। महाभागा इति। तेषां भगवत्या: प्रसादभाजनत्वेन भाग्यश्लाघा, तत्र गताया: प्रवृत्तिमाह - तस्मिन्निति। काञ्चनीं डोलामारुह्येति हिमवत्येव नित्याधिवासी तद्वाहनभूत: सिंह: आविर्भूतशरीरां दुर्गां समालक्ष्य स्वयं डोलायितशरीर: सुवर्ण सवर्णा: तामुदवहदिति रहस्यम्। चिरं कालं लोकानां हितकाम्ययेति असुराणां सुम्भादीनां पुण्यक्षयं प्रतीक्षन्ती लोकहितमिच्छन्ती स्वप्रादुर्भावमात्रेण सर्वेषां योगक्षेममाविष्कुर्वन्ती तत्परिपन्थिनां नि:शेषनिषूदनावकाशं घटयितुं चिरं कालं तत्रावसदिति। गायन्तीव हसन्तीवेत्यत्र उभयत्र इव शब्द: तन्मुखमीक्षतां गानहासयो:

तदधिष्ठानत्वं स्फुटयन्तीति द्योतनार्थः। तेन चास्या गाम्भीर्यं द्योत्यते। अथासुरवधावकाशे एवमासीदिति वक्तुमुपक्रमते तामित्यादिना॥ कौ तौ चण्डमुण्डनामानाविति विवक्षायामाह - भृत्यौ सुंभनिसुंभयोरिति। ननु सुंभनिसुंभौ स्वर्गस्थौ तद्भृत्याविमौ कथमिमां दृष्टवन्तावित्यत्राह - यदृच्छया पर्यटन्तौ मेदिनीमिति कामचारिणाविति पदेन तौ कर्तव्यान्तराभावात् प्रतियोग्यभावात् स्वैरचारसौकर्याच्च तत्र तत्र लोकवृत्तान्तबुभुत्सया स्वेच्छानुरूपं रूपमास्थाय सर्वत्र संचरन्तौ। तत्राप्यकस्मादागतौ तां दर्शतुरिति भावः। अथाननुज्ञातायां दौष्कुल्ये कथं ग्राह्यता, तत्राऽऽहतुः स्त्रीरत्नमिति। यथाह मनुः -:

श्रद्धया नश्शुभां विद्यामाददीताद्धरादपि।
अन्त्यादपि वरं धर्मःस्त्रीरत्नं दुष्कुलादपि॥

इति तस्याः स्त्रीरत्नत्वमेवोपपादयतः नैवेत्यादिना देवगन्धर्वादिष्वीदृशी काचिन्नास्तीत्येवास्यार्थ इति केचिदाहुः।

अस्मद्गुरूपदेशसिद्धोऽर्थस्त्वेवं - देवगन्धर्वासुरनागाङ्गनां यद्यपि सर्वेगुणाः संभवन्ति, तथापि, तत्तज्जातिषु एकैकस्य प्राधान्येन प्रतिनियतत्वं विद्यते। तथापि, तेषा प्राधान्येन प्रतिनियतानामियत्ता विद्यत एव। अयं गुण एतावानिति। अस्यास्तु सर्वे गुणाः तुल्यप्रधाना अपरिमिता चेति प्रायेणायं निषेधः क्रियते - नैव देवीत्यादिना देवस्त्रीणां माहात्म्यलक्षणो गुणः प्राधान्येन प्रतिनियतः, गन्धर्वस्त्रीणां तु रमणवशीकरणलक्षणः, असुरस्त्रीणां विमोहननैपुण्यलक्षणः, नागाङ्गनानां अभिरामावयवत्वलक्षणः इति यथायथं द्रष्टव्यम्, किं बहुना, एतावन्मात्रमेव वक्तव्यमित्याहतुः - दृष्टपूर्वेति। तथापि, यथाशक्ति वर्ण्यतामिति चेत्तत्राहतुः - त्रैलोक्य इति। इह खलु पुरा सकललोकसृष्टिकर्त्रा ब्रह्मभुवात्रैलोक्यहावभावसमन्विताः सुचार्वङ्ग्यः। हावेन पुरुषवशीकरणवैदग्ध्येन, भावेन कटाक्षचातुर्येण समन्विताः सर्वाङ्गसौन्दर्योपिताः याः स्त्रियः तासां तिलश आदाय ताभ्यः सारासारविवेचनपूर्वकं अङ्गचातुर्यहावभावादि लक्षणं गुणजातमुद्धृत्य एकत्र समाजिहर्षुणा निर्मिता किल तिलोत्तमा काचिदप्सराः। इयन्तु पुनस्तेनैव स्वसृष्टिवैभवं दर्शयितुमिच्छा तिलोत्तमासरूपाः सहस्रसंख्याताः सृष्ट्वा

ताभ्यश्च सारासारविवेचन चतुरया धिया सौन्दर्यसारसर्वस्वं निष्कर्षेणोद्धृत्य तत्सर्वमेकत्र समाजिगीर्षुणा निमीतेव इत्येतद्विषया काचिदभूतोपमा वक्तव्येति भाव:। ऊनषोडशवर्षेव ऊनोऽसंपूर्ण: षोडशो वर्षो यस्या:सा तथा तथाभूतेव प्रतिभाति। अत एव संपूर्णनवयौवना देवतेवेति। अत्र इव शब्देन तस्या: तत्वत: तद्भावेऽपि ताभ्यां तथात्वं तन्महिमवशात् प्रायेण स्फुरितमासीदिति द्योतितम्। निर्जन इति॥

ननु पुरस्तात्सिद्धचारणसेवितमित्यादिना वर्णितमेतत्; कथमेवमुच्यते। उच्यते, अत्र तत्संबन्धी कश्चिज्जनोऽस्तीत्येव विवक्षा। तद्दर्शनसमये तत्रान्य: कोऽपि जनो नादृश्यतेति वा, तां भवान् द्रष्टुमर्हति इति प्रथममुक्त्वा, तदेतदेव पुन:सहेतुकमाह रूपसंपदोपेतामित्यादिना॥ तामुक्तरूपां एवं कारणेन तु पौनरुक्तम्। यानीत्यादिना पुनरपि तत्सौन्दर्यवर्णनामुखेन तं प्रोत्साहयत: गजाश्वादीनि, रत्नादीनि, स्वस्यां जात्यां यदुत्कृष्टं तत्तद्रत्नं विदुर्बुधा: इति वचनात् नपुंसकलिङ्गनिर्देश:। तत्सामानाधिकरण्यञ्च एकदैवोपपादयति - ऐरावत इत्यादिना। समानतोहृत: अब्धिशुद्धोद: भ्रातु: परिग्रह:। परिगृह्यत इति परिग्रह:। भ्राता परिगृहीत इति यावत्।

निसुंभस्य वशे वर्तन्त इति शेष:। अभ्युपागता दृष्टिपथगता स्वयमेव तव भाग्यादित्यर्थ:। त्रैलोक्यराज्यादधिका त्रैलोक्याधिपत्यमप्यपहाय स्वीकार्येति यावत्॥ कस्मादिति - तत्र को हेतु:। न कोऽपि, किन्तु तवौदासीन्यमेव कारणं, अयुक्तमेतदिति भाव:। निशम्यैतद्वचनं इत्यादि। अत्र प्रोत्साहनवचनस्यापि मन्मथावेशहेतुत्वोक्ति:, तत्सौन्दर्यवर्णनापरत्वात्। परमार्थतस्तु तत्सौन्दर्यश्रवणमेव तत् 'पारवश्यहेतु:, तत्र तस्यां प्रायेण वर्ण्यमानायां सत्यां तस्य मनसि मदनावेश: समजनि।

तदानीं, अस्मिन् मदनावेशेन जडीकृते मूकीभावं गते इति तयोस्तत्रौदासीन्यभ्रमोऽभवत्. तत्र प्रोत्साहनं कृतम्, अतोऽत्र प्रोत्साहनं न प्रवृत्तिहेतु:। सौन्दर्यश्रवणात्तस्यां जातो राग एव इत्यादि सर्वं द्रष्टव्यम्।

कुत: सुग्रीवं प्रेषयामासेति, तत्राह - सुग्रीवन्नामेति। सुग्रीव इति प्रसिद्ध:। खल्वसौ तत्रोभयथास्य प्रसिद्धिरित्याह - दुर्द्धर्षं दौत्यकर्मणि कोविदमिति। दूतस्य भावोदौत्यम्, तद्भावे यत् कर्म तत्र विशारदं, अनेन

असौ नयज्ञ इत्युक्तम्। दुर्द्धर्षत्ववचनेन शस्त्र विशारदत्वम्. तथा च दूतलक्षणं कथ्यते कामन्दकीये :-

"प्रगल्भ: स्मृतिमान् वाग्मी शस्त्रे शास्त्रे च निष्ठित:। इत्यादि॥ इतिचेतिचेति॥.... तदानयने सामभेदाद्युपायै: बहुविधं...... इति द्योतितम्. तत्प्रकारमेव समष्टीकृत्याह - यथेति॥ मम वचनात् तन्मुखेन त्वया वक्तव्या स्वल्पसैन्यसमन्वित: शोभनेन अल्पेन सैन्येन समन्वित: त्रैलोक्यपरमेश्वर: इत्यत्र यच्छब्दोऽध्याहार्य:। भूतानि वस्तूनि मां वेत्यादि. अत्रैतद्वचनं स्वस्य भ्रातृमत्वलक्षणस्य गुणस्य द्योतनार्थं, तस्यात्मनि स्निग्धतरत्वद्योतनार्थञ्च स्वस्माद्युवा निसुंभ: युवानं कामयाना हि स्त्रिय: इति यन्निसुंभं वा वृणुयात् इति स्वयमेव किञ्चित् भीत आह - अतुलमिति। सुम्भस्यैश्वर्येण सदृशमैश्वर्यं न कस्यापि अत: तत्परिग्रहे तत्तवैव स्यात् इति सुग्रीव: तन्मुखेनैवाह - मत्परिग्रहणं व्रजेत्यादि प्रयोग उपपद्यते। इत्युक्तेत्यादि। इत्युक्ता सा भगवती जगौ। कथं। अन्त:स्मितं एतद्वचनश्रवणानन्तरं तस्या: अन्त: महान् हासो व्यजृम्भत। तन्निगृह्य किञ्चिन्मन्दस्मितं कृत्वाऽब्रवीत्। तर्हस्यस्य मन्दस्मितस्य कोऽभिप्राय: इति चेत्, तं ज्ञातुं झटिति दुष्करमित्याह - गम्भीरिति। गाम्भीर्यगुणयुक्ता, अत: तन्मन्दस्मिताभिप्रायो दुर्गूह इति भाव:। गम्भीरान्त:स्मितमिति समस्तमिति केचित्। तर्हि मन्दस्मितकरणं किमनेनाभिप्रायेण बत: मम सदृश: भर्ता अयं लब्ध इति मत्वेति चेन्नेत्याह दुर्गेति। नित्यकन्यका हि सा, तर्हि सौन्दर्याभिमनात् इति चेत्, नेत्याह - भद्रेति। सौन्दर्यगर्वादि दोषरहितेत्यर्थ:। तर्हि तं हत्वा तदैश्वर्यं बुभुत्सयेतिचेत्। तदपि नेत्याह - भगवतीति। स्वत एव ऐश्वर्यादिषड्गुण - परिपूर्णा। कोऽत्रहेतुरिति निरूप्यमाणे निशितधीभिरेवं विज्ञायत इति भावेनाह - य इदं धार्यते जगादिति। अथं भाव: - असुरवधेन जगद्रक्षणार्थो हि भगनवत्या: प्रादुर्भाव:। तदवसरोऽयं संग्राम इति हर्षो मन्दस्मितहेतु: इति।

अत्र सुम्भनिसुम्भौ विषयीकृत्य; उक्तमेव विशदयति - त्रेलोक्येति। तर्हि मया सह आगम्यतामिति। तत्राह - कञ्चिदिति। आगन्तव्यमेव तत्र, पूर्वं किञ्चित् कृत्यमस्तीति भाव:। किन्तदिति -

तत्राह - अत्रेति। भर्तृपरिग्रहं विषयीकृत्य मिथ्या तत् क्रियते। कथमिति। तन्न मिथ्याकर्तव्यमिति भावः। तर्हि कीदृशी सा प्रतिज्ञेति, तत्राह - श्रूयतामिति। अल्पबुद्धित्वादिति इयं अनुतमेति प्रकाशनार्थं तत्प्रकाशनञ्च सहगमन श्रद्धा प्रत्ययाय, तच्च तयोस्तत्र शीघ्रमागनं घटयितुं गंभीरस्वभावत्वाद्वा, यो मां जयति संग्राम इति स उत्तमो वरः। तत्र केनचिदशक्यञ्चेत् यो मे दर्पं व्यपोहति, स मध्यमो वरः। कञ्चित् कालं युद्धं कृत्वा दर्पहरणमप्यशक्यञ्चेत् यो मे प्रतिबलः क्षणमात्रमपि प्रत्यवतिष्ठते, सोऽधमो वरः। अथ समे भर्ता भवेदिति तत्तत्त्रयाणां तत्त्रयेण ग्रहणं वाक्ययोजनायामुक्तप्रकारेणोत्त ममध्यमाधममतभेदेन इन्द्रेण पृथक्पृथक् ज्ञेयम्। तस्मात्कं चिरेणात्रेति।

अतः परं क्षणमात्रमपि न विलम्बनीयमिति भावः। पूर्वं प्रयुक्तसामोपायः सुग्रीवः संप्रति दृष्ट शङ्काजनकं भेदं क्षुभितचित्तः करोति - अवलिप्तासीति। मागमिष्यसीति। तथा गमनस्यावकाशं मा कृथा इति भावः। अनालोचिता आलोचनमकृत्वा कृतेति यावत्। शक्याशक्यविवेकः आलोचनं स च युक्तः, युक्तं करोतु यत्। यद्युक्तं, स च स एव न त्वं यतो दूतोऽसि। "यथोक्तं दूतः आचष्टे वध्यः स्यादन्यथा ब्रुवन्"।

इति गूढार्थदीपिकायां पञ्चमोऽध्यायः॥ ५ ॥

॥ अथ षष्ठोऽध्यायः ॥

धूम्रलोचनदैत्यस्य सबलस्योच्यते वधः।
सुम्भासुरनियुक्तस्य देव्याः सिंहेन चाधुना॥

तत्र तावत् सुग्रीवस्य प्रवृत्तिशेषमाह - इत्याकर्ण्येत्यादिना। एषोऽहमिति। न पूर्वागतवत् त्वामनादाय गमिष्यामि; किन्तु केशेष्वाकृष्य विवशां कृत्वा बलान्नयामीत्यर्थः। एवं उक्तप्रकारेण केशाकर्षणादिना हुङ्कारेणैव हुं इति शब्दोच्चारणमात्रेणैव। सवाहनं सः पूर्वं डोलारूपेणावस्थितः तदानीं स्वरूपमवलम्ब्येति सिध्यति। आज्ञापयामास ताविति। अत्र च शब्देन तत्सहचरणामपि प्रधानभूतानामाज्ञापनं द्योतयति। तथा च वक्ष्यति - तेनाज्ञमा

इत्यादिना। तत् तर्हि बध्वा गृहीत्वा वा तथाम्बिकामिति पुनरुपन्यासः। कथञ्चिदानेतव्या चेत् तदेव कार्यमिति प्रकाशनार्यम्।

इति गूढार्थदीपिकयां

षष्ठोऽध्यायः॥ ६ ॥

अथ सप्तमोध्यायः

अथ देवीललाटोत्थवपुषा भद्रया तयोः।
अत्रोच्यते सबलयोरध्याये चण्डमुण्डयोः॥

तत्र तावत् सुम्भनियुक्तानामसुराणां प्रवृत्तिशेषमाह - तेनेत्यादिना। ईषद्धासां इति। असुराणामप्यगमदर्शनात् अन्ये युद्धलालसाः कोपञ्चकारेति वदता सा स्वाधीनकोपेति दर्शितम्। ललाटफलकात् ललाटतटात्। तौ चण्डमुण्डौ। महासुराविति तयोःशिरसीति भावः। शिरस उत्तमाङ्गत्वेन प्राधान्यात् महासुरत्वोक्तिः। चामुण्डेति चण्डमुण्डवधकरणात् प्रातीतिकग्रहणेयं निरुक्तिः। बहुविधं हि निरुक्तं, तथाहि श्रूयते -

''वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ'' इत्यादिना॥

इति गूढार्थदीपिकायां सप्तमोऽध्यायः

॥ अथाष्टमोऽध्यायः ॥

भ्रदया शिवदूत्या च तथा मातृऽगणेन च।
उपायाद्रक्तबीजस्य कौशिक्याप्रोच्यते वधः॥

तत्र तावत् सुम्भस्य प्रवृत्तिमाह - चण्डेत्यादिना। सर्वसैन्यानाम्ति देत्यानां विशेषणं, सर्वाणि चतुर्विधानि सैन्यानि एषां इति सर्वसैन्याः। दैत्याः दितिवंश्याः। षडशीतिः षडशीतिसंख्याकाः, कम्बूनां चतुरशीति कुलानीति शेषः। कालकादौ संख्यानुपादानमसंख्येयत्वात्। क्रव्यादाः मांसाशनाः कङ्काद्याः। आयान्तं सुंभं तत्सैन्यस्य आयान्तमिति सैन्यविशेषणं वा। पुंस्त्वमार्षं, धरणी गगनान्तरमिति। तत्र गगनशब्देन अन्तरिक्षलोक उक्तः।

तत्र धरण्या अन्तरं गुहाद्याः गगनं अन्तरिक्षलोकः सिद्धजनमार्गः, तदन्तरं तस्य तिर्यगूर्ध्वाधो भागं गगनशब्देन स्वर्गं लक्षयित्वा द्यावापृथ्व्योरन्तरमिति वा। अतीव पुनःपुनरित्यर्थः। ज्यास्वनातिशायित्वेन स्फुरदिति वा। तन्नादं धनुर्ज्या सिंहयोर्नादं। यस्य देवस्य यद्रूपं यथा वाहन भूषणं यत् तद्वत् तादृशरूपवाहनभूषणयुक्तं यथा भवति तथेत्यर्थः। तथा तच्छक्तिः तस्य शक्तिः, एतदेव क्रमेण विवृणोति हंसेत्यादिना। अपि चेत्याह - यज्ञेति। किं त्वेत्याहनारसिंहीति। ईशानः वीरभद्रः अतिभीषणरजस्तमोगुण प्राधान्येन भयङ्करकर्मकारिणी अत्युग्रा, आकृत्या च भीषणा शिवाशतविनादिनी तदानीं शिवा भाव्यसुर, विनाशं सूचयन्तो युद्धभूमिं गताः। पिशिताशनाञ्चारो रूपन्निति शिवाशतविनाशिनीत्युक्तं। शिवा शतं विशेषेण नादयितुं शीलमस्या इति शिवाशतविनादिनी। इतरं जनं विहायेशानं कस्मादवोचदिति विवक्षायामाह - धूम्रजटिलमिति। धूम्रजटायुक्तम्। अनेन तस्यावधूतवेषमश्रित्य स्थितत्वात् तेषाममुष्मिन् विद्वेषस्यासंभवात्, अस्य तत्सन्निधाववस्थानिवेदनार्थं नियोज्यत्वं निवेदितम्। अपराजि तेत्यनेन भयात् द्रुतप्रस्थापनं, किन्तु तेषां कोपोत्पादनेन युद्धोद्योगमेव घटयितुं इति सूचितम्। भगवन्निति संबुद्धया तदार्जवं करोति। त्वं वै खल्वैश्वर्यादि षड्गुणपरिपूर्णत्वात् ईदृशे नीचे कर्मणि न नियोक्तव्यः इति जानत्यपि अहं त्वांनियोजयामि। अवश्यकार्यस्यावश्यकरणीयत्वात्, अन्यस्य यस्य कस्यापि अदर्शनाच्चेति व्यञ्जितम्। मच्छिन्वा इति॥ मम प्रादुर्भावसमये रोदनं कृतवन्तो गोमायवः। रक्तबीजः इत्यस्य नाम्नः प्रवृत्तिनिमित्तमाह - रक्तबिन्दुरिति॥

ब्राह्मणो वरलाभोऽत्र कारणमित्यवगन्तव्यम्। गदया ताडयामासेति सैव वैष्णवी चक्रप्रहारानन्तरं गदया ताडयामासेत्यर्थः। कीदृशं रक्तवीजमिति विवक्षायां तं विशिनष्टि। ऐन्द्रितं इतिऐन्द्रया इतं प्रामं ऐन्द्रया सह युद्धयन्तमित्यर्थः। तस्येति कार्यकारणाभेदविवक्षया रक्तबीजाभिप्रायेणैकवचन तस्य शोणितमित्यसुरभावेन परिणामात्प्रागेव स्वजिह्वाग्रपतितं पतनसमनन्तरमेव पपौ इति।

इत्यष्टमोऽध्यायः।

अथ नवमोऽध्याय: ॥

कौशिक्या युद्ध्यतोस्तत्र तयो: सुम्भनिसुम्भयो: ।
निसुम्भस्य वधोऽध्याये नवमेऽस्मिन् प्रकाशते ॥

तस्य रक्तबीजवधप्रकार श्रवणविस्मितचेतसो राज्ञ: सुंभनिसुंभ योरपि वधप्रकारविवत्सया प्रश्नमुत्थापयति - विचित्रमिति।

माहात्म्यं परिच्छेद्यस्वरूपत्वं, ताभ्यां प्रयुक्तानितिशेष:। तस्य निसुम्भस्य युद्धं विशेषतो वर्णयति - निसुंभे इति। निर्घातनिस्वन इति। भूमे: पवन: पवनाभिहतो गगनादवनौ यदा समापतति भवति.... तदा निघात इति निघातलक्षणम्

इति नवमोऽध्याय:

अत दशमोऽध्याय :

दशमे बहुमायस्य सुम्भस्य वध उच्यते।
कौशिक्यात्मनि संलीनचामुण्डादि शरीरया ॥

गर्न्वमावहेति गुणानुद्भाव्य कस्मिंश्चित् तत्र पूजा प्रवर्तनी। मानसी साध्यविषया वृत्ति: बहुमतिर्मता। सैव स्वविषया दूरी कुर्वाणा गुणिनो वरान्।

श्लोघाभिमाने नैर्लज्ज भावनी गर्व उच्यते। इति तल्लक्षणम्। असुराणाञ्चेति। तत्रावशिष्टास्ततोन्येऽसुराश्च देवै: सह युद्धमपश्यन्नित्यर्थ:। नियुद्धं मल्लयुद्धम्

इति गूढार्थदीपिकायां दशमोऽध्याय:

॥ अथ एकादशोऽध्याय : ॥

सुंभासुवधोद्भूत हर्षपूरितचेतसाम्।
इन्द्रादीनामीर्यतेऽत्र स्तुतिरेकादशेऽधुना ॥

तत्र भूमौ देव्या कौशिक्या महासुरेन्द्रे सर्वासुरवीरनायके सुम्भे निहते सति,

सुरा: सेन्द्रा: पूर्ववदेव स्वनायकं कृत्वा वन्हिपुरोगमा: स्वस्वहविर्भाग दातारमात्ममुखभूतमग्निमपि पुरस्कृत्य

कात्यायनीं सकलप्रपञ्चोपादानभूतां परां शक्तिं तुष्टुवु:। तत्र स्तुते: वैशिष्टयद्योतनार्थं विशेषणं, इष्टलाभात् विकासवक्त्रांशु विकासिताशा इति। तत्र सुरास्तावत् स्तुतिकर्तार:, ज्ञानैश्वर्यादिना सुष्टु राजन्त इति हि सुरा:। तत्रापि सेन्द्रा: स्तुतावपीन्द्रन्नायकं कृत्वा तदनुसारेण स्तोतुं प्रवृत्ता इति वर्णना बाहुमुख्याभावाच्च स्वारस्यम्। महासुरहननमनन्तरसमुचित समयसमुपक्रान्तत्वाच्च सकलजगत्स्वामिनीविषयतया च स्तोतृणामभीष्टलाभेन विशेषत: प्रहृष्टतया च स्तुते: शब्दतोऽर्थतश्च माधुर्यामिह व्यज्यते। तत्र तावत् सुंभासुरवधसमयसमुज्जृम्भितक्रोधशान्तिमाशंसमाना: स्वान् बहुधा संबोधयन्त: प्रार्थयन्ति - देवीति। हे देवि! प्रसीद! हे चित्प्रकाशानन्दरूपिणि! अलं अलं क्रोधेन, प्रसादेनास्मासु सौमुख्यं कुरु। प्रपन्नार्तिहरे इति संबोधयतामयं भाव: स्वपादकमलभक्तिभाजां विपक्षविक्षोदनफल: तवायं कोप: स च संप्रत्यस्मद्विपक्षविक्षोदनफलावाप्त्या सकल: संवृत्त:। तस्मादत: परं कोपेन कर्तव्याभावात् तमपहायास्मासु प्रसादं कुर्वित्यर्थ:। भवत्यामप्रसन्नायां मादृशां किं शरणमिति भावेन पुनरपि तां संबोधयन्त: तदेव प्रार्थयन्ति - प्रसीदमात: जगतोऽखिलस्येति। मातरि क्रुद्धायां स्तनपायिनां बालानां किं शरणं? तद्वदस्माकमपि त्वदेकशरणानां भवत्यां क्रुद्धायां किं शरणं? न किमपि 'तस्मात् क्रोधं त्यक्त्वा प्रसन्ना भव॥ मम कुतो जगन्मातृत्वमित्यत्र हेतुं वदन्त: संबोधयन्ति -: विश्वारणीति॥ सकलजगदुत्पत्तिस्थानभूतत्वात्तव जगन्मातृत्वमिति भाव:। तस्मात् पाहि, विश्वं त्वत्तो लब्धसमताकमिदं विश्वं त्वमेव पुत्रवत्पालयेति भाव:। तर्हि जनक इवान्य: कश्चिदीश्वरो ममापि नियामको रक्ष तत्। तत्राहु: त्वमीश्वरी देवि चराचरस्येति। त्वदन्य: कश्चिदीश्वरो नास्त्यस्य जगत:, ब्रह्मादय: त्वन्ये त्वद्गुणलब्धशरीरास्त्वदधीन शक्तयो विश्वं सर्गादौ प्रवर्तन्ते तत: त्वमेव साक्षात् सकलजगत्कर्त्री पालयित्री चेति भाव:।

अथ जगदीश्वरत्वमेव साधयन्त: स्तुवन्ति - आधारभूतेति। त्वं जगत: चराचरात्मकस्याधारभूता आश्रयत्वेन वर्तसे। अत्रान्यनैरपेक्ष्यन्दर्श

यितुमेकेति विशेषणम्। तर्हि कथंभावेन जगतः आधारभूतेत्यत्राह - महीस्वरूपेणेति॥ ततो जगत आधारभूतेति हेतुत्वेन संबन्धः। किञ्चेत्याह अपामिति। पानीयं प्राणिनां प्राणाः

'वृष्टेरन्नं ततः प्रजाः' 'प्राणिनां जीवनं ह्यम्बु' इत्यादि शास्त्रप्रसिद्धेः। प्रत्यक्षतया च सकल जगदाप्यायकत्वमपां प्रसिद्धम्। त्वमेव तद्रूपेण स्थित्वा जगदाप्याययसि। एवं सर्वप्राण्याधारत्व माधेयानामाप्यायकत्वञ्चाभिधाय संप्रति विष्णोः सकल जगदाप्ययकत्वप्रसिद्धिमाशङ्का परिहरति - त्वं वैष्णवीशक्तिरिति। विष्णोर्हि जगत्पालनेया शक्तिः सा हि त्वद्व्यतिरेकेण न संभवति। तस्य तद्गुणगृहीतविग्रहत्वात्। तस्मात् श्री नारायणेपि तच्छक्त्यात्मना त्वमेव जगदाप्यायसीत्यर्थः। इतरेतरव्यावृत्तसमस्तवस्तुव्यामौ सामर्थ्यप्रतिपादनार्थमाह अनन्तवीर्ये आकाशवत् समस्तवस्तु व्याप्य वर्तितुं समर्थेत्यर्थः। अत्र हेतुः विश्वस्य बीजमिति॥ सर्वोपादानत्वात्तव तादृशीत्वमिति भावः। एवं विष्णूपलक्षणेन शक्त्यात्मना सकलजगद्व्यापिनीत्वमभिधाय बन्धमोक्षहेतुत्वमपि प्रतिपादयति परमा हि मायेत्यादिना॥ परमा ब्रह्मादीनामपि मोहिनी माया मायाख्या शक्तिः त्वं, अत एव तद्रूपिण्या समस्तमेतज्जगत् त्वया मोहितम्। अनात्मनि देहादावात्मादि भावेनानादि कर्म कामवासनया परिभ्रामितं, अनेन अविद्यारूपेण बन्धहेतुत्वमुक्तम्।

अथ भक्तानां विद्यारूपेण मोक्षहेतुत्वमप्याहुः त्वं वा इति। प्रसन्ना भक्त्या समाराधनेन वशीकृता त्वं भक्तानां संसारबन्धविध्वंसिनी। वै इति प्रसिद्धौ।

ननु संसारमुक्तिहेतुर्विद्या, बन्धहेतुः स्त्रियः, तत्कथं तदुभयकारणमहमेवेत्यत्राहुः - विद्या इति। विद्याः साङ्ख्ययोग पाञ्चरात्र पाशुपत वेदान्तादि लक्षणानि मोक्षशास्त्राणि तव भेदाः शब्दरूपिण्या तव विकाराः मुक्तिहेतवः। तथा सकलाः चतुष्षष्टिकलाः विद्या सहिता मोहनवैभववत्यः समस्ताः स्त्रियः बन्धहेतवश्च त्वदंश इत्यर्थः। एवं बन्धमोक्षहेतुत्वमुक्तार्थाद्युक्तमेव, समस्तव्यापिनी त्वं कण्ठोक्त्या विशदयन्तः स्तुतेरशक्यतां वदन्तः स्तुवन्ति -

त्वयैकयेति॥ अम्बया सकलजगदुपादानभूतया त्वया एतच्चराचरात्मकं जगदापूरितम्। स्वविकाररूपमिदं जगन्नियम्य नियन्तुशक्त्यात्मना स्वरूपेण नियमितमित्यर्थः।

यत एवंभूता त्वं, अतः ते त्वद्विषया, तत्रापि स्तव्यपरा तात्विकस्वरुपगोचरा, परोक्तिः विशिष्टोक्तिः स्तुतिः गुणगणवर्णना परा वाणी। काचन काचित्। अत्यन्तविशारदस्यापि कस्यचित्वाणी त्वद्गुणगणवर्णनायां न प्रगलभते, तव अपरिच्छेद्यस्वरुणिणीत्वादिति भावः।

अथवा, त्वद्भक्तिभाजां केषाञ्चित् त्वत्कारुण्यवशान्निरर्गलं निःसरेयुरेव इति वदन्तः स्तुवन्ति-: सर्वभूतेति॥

त्वत्स्तुतौ स्तुतये काः काश्चित् परमोक्तयः भवन्ति वा, केषाञ्चिद्भाग्यवतां तवैव प्रसादात् त्वत्स्वरूपगोचरा विशिष्टा भारत्यः स्तुतये कलपन्ते वा. वाशब्देव तव कारुण्यं दुर्लभमिति व्यञ्जयन्ति। तत्र भक्तेषु कारुण्यसद्भावं व्यञ्जयन्तः संबोधयन्ति। तदेतत्संभावयितुं "सर्वभूते सदा देवि स्वर्गमुक्तिप्रदायिनी इति, सर्वभूते सर्वात्मिके इति संबोधनम्। अथवा, सर्वभूतं विषयीकृत्य भक्तिमात्रं कुर्वतो यस्य कस्यायि जनस्य तस्य जात्यादिना हीनत्वोत्तमत्वादिकमनपेक्ष्येति यावत्। सदा सार्वकालं, कालविशेष मप्यनपेक्ष्य स्वर्गेच्छाः स्वर्गं अपवर्गेच्छोः अपवर्गमुभयेच्छोः उभयं च दातुं श्रये। अतो भक्तेषु त्वत्कारुण्यस्य स्वरसत एव संभवात्। त्वत्स्तुतौ प्रावृत्तानां तन्मात्रेणैव त्वद्गुणगणवर्णनापरा वाणी निःसरेदेवेति भावः। तस्या एतत्सौकर्यमेव सूचयन्तः स्तुवन्ति-: सर्वस्येति॥

अत्र नारायणीशब्दो विष्णुमायापर्यायः। विष्णुमायां प्रतुष्टुवुरिति हि पुरस्तादुक्तम्। तत्र हिमवती पार्वतीदेहादस्याः प्रादुर्भाववर्णनेनापि पार्वत्याः पद्मायाश्च परमार्थतो न भेद इति व्याञ्जितम्।

तत्रायंभावः- सर्वो हि जनः बुद्धयाऽध्यवस्य वाचा वदति "यद्धि मनसा ध्यायति तद्वाचा वदति" इति श्रुतेः। वाग्विलासस्य बुद्धिपूर्वकत्वात् बुद्धेश्च त्वत्स्वरुपत्वात् भक्तानां त्वत्स्वरूपोद्बोधनन्तद्वचनञ्च

तव सुकरमिति भाव:। विश्वस्येत्युभयत्रापि संबद्ध्यते। विश्वस्य परिणामप्रदायिनी विश्वस्योपरतौ शक्ता चेति।

ननु कश्चित् कदाचित् स्वर्गं प्राप्नोति। कदाचित् कश्चिन्मुच्यते इति काल एव स्वर्गापवर्गयो: कारणमित्याशङ्क्य कालस्यापि तद्रूप्यं साधयन्त: स्तुवन्ति-: कलेति। कलाकाष्ठादिलक्षणलक्षणकालविशेषात्मनाऽवस्थाय विश्वस्योत्पत्त्यव्ययादिपरिणामविशेषमुद्भाव्यान्ते समस्तमपि संहर्तुं त्वमेव शक्तासीति स्वर्गापवर्गयोरपि त्वमेव कारणम्। कालस्यापि त्वद्व्यतिरेकेणासंभवादिति भाव: । अस्तु तर्हि कालात्मना ममावस्थानम्, तथापि पुरुषार्थविशेषप्राप्तौ पुण्यविशेषस्यापि कारणत्वान्मदेककारणत्वमयुक्त मित्याशङ्कां परिहरन्त: प्रणमन्ति - सर्वेति॥ सर्वाणि मङ्गलानि पुरुषार्थसाधनानि पुण्यकर्माणि तेषां माङ्गलये मङ्गलत्व कारिणि - अत्र हेतु: शिवेति। मङ्गलस्वरुपिणि। अत एव तर्वार्थसाधके भक्तानामभीष्टप्रदानशीले। अत्र एव शरण्ये पुरुषार्थाभिराश्रयणीये॥

अयं भाव:- पुरुषाथहेतु: पुण्यकर्मापि न तद्व्यतिरेकेण तस्यापि तदात्मकत्वात् कालवदिति। किञ्चेत्याह- सृष्टिस्थितिविनाशानामिति॥ सृष्टि: जगतो निर्माणं स्थिति: संसृष्टस्य पालनं, विनाश: तस्य कालान्तरे संहार:। तेषां कर्तृभूते।

ननु सत्वरजस्तमांसि सृष्ट्ययादि हेतव:, तत्कथं तस्या: तत्कर्तृत्वमित्वयाशङ्कययाहु:- गुणाश्रय इति। गुणा :। आश्रय: सृष्ट्ययादि साधनं यस्या: सा, तथा तत्र गुणमय इत्येनेन ते च गुणा: त्वद्व्यतिरेकेण न विद्यन्त इत्युक्तम्। अयम्भाव:- स्वरूपभूतेन रजसा ब्रह्माणमुत्पाद्य जगत्सृजसि। स्वरूपभूतेन सत्वेन विष्णुमुत्पाद्य जगत्पासि। स्वरूपभूतेन तमसा रुद्रमुत्पाद्य जगत्संहरसि च त्वमेवैति। न केवलं एवं ब्रह्मादिरुपेण जगत्सृष्ट्ययादिकं करोषि॥ स्वयमपि स्वगुणविशेषमुपादानेन लीलयागृहीतविग्रहा दुष्टानिग्रहादिना भक्तान् पालयसीति भावेनाह-: शरणागतेति॥ सर्वस्यार्तिहरेति॥ शरणगतस्याविनयस्य कस्याप्यार्त्तिहरे किन्तु उत्तमो वा हीनो वा य: शरणं गच्छेत् तं तमेवेयमनुगृण्हीयादविशेषेणेति द्योतनार्थ मनुवादोऽयम्।

कौशिकीदेहसंलीना ब्रह्माण्यायाद्यास्तु शक्तयः।
तदंशा इति निश्चित्य तद्रूपेण स्तुवन्ति ताम्॥

हंसेत्यादिभिः। अत्र ब्राह्माणीरुपेण नारायण्या अवस्थानं वर्णयद्भिः तदभेदेन स्थिता नारायणी नमस्क्रियते। वाहनादि स्वीकारोक्त्या च दुष्टनिरसनोद्यतत्वं शिष्टपरिपालनदीक्षितत्वं च तद्रूपस्य द्योतयद्भिः भक्तानां वात्सल्यमेव प्रकटीक्रियत इति द्रष्टव्यम्। माहेश्वरीस्वरुपेण स्थिते इति शेषः। मयूरो वाहनं कुक्कुटोध्वा जलाञ्छनं,। इयं गृहीतपरमायुधा कैर्गृहीतपरमायुधा शङ्खचक्रगदाशार्ङ्गैः गृहीतपरमायुधा। वाराहीरुपसंस्थाने वाराहीरूपेण वाराहीत्वस्वरूपेण संस्थानं स्थितिर्यस्याः सा तथा। नृसिंहरुपेण नारसिंहीरूपेण, अत्राप्रस्तुतविभूत्यन्तरानुवर्णनेनापि स्तुवन्ति-: लक्ष्मीत्यादिना॥ महाविद्या ब्रह्मविद्या श्रद्धा धर्मादिष्वास्तिक्यबुद्धिः। पुष्टापुष्टिः परिकररसमृद्धिः। स्वधापितृक्रिया, ध्रुवाशब्देन यज्ञसाधनवाचिना स्वाहा लक्ष्यते। नित्येति केचित्। महारात्रिः ब्रह्मरात्रिः, महामाया पञ्चपर्वा विद्या। मेधे विद्यामेधे। आशुग्रहणशक्तधीः मेधा, सरस्वती

वाग्देवता, शिवा शाम्भवी शक्तिः भूतिः सात्कि बाभ्रवी राजसी सर्वतइत्यादि। अनेन परमेश्वरीज्ञानकर्मेन्द्रियमकर्म जत्वाद्देशकाला दिविप्रकृष्टसमस्तवस्तु विषयीकरण सामर्थ्य मनुवर्णयन्तः स्तुवन्ति। अत्र पाणिपादान्तशब्दः कर्मेन्द्रियान्तरोपलक्षणार्थः, मुखशब्देन रसनोपलक्ष्यते। शिरःशब्देन त्वगिन्द्रियमुपलक्ष्यते उत्तमाङ्गं हि शिरः, तेनाङ्गान्तरमुपलक्ष्यते न पुन. तद्व्ययापित्वगुणलक्षिता भवति। यद्वा यमष्टिव्यष्टिशरीरोपादान भूता हि प्रकृतिः तस्मादस्मदादिदेहेन्द्रियाणां विराट्देहेन्द्रियाणां च तत्तद्विषयं प्रतिनियता शक्तिः या अस्याः ताद्रूप्यमनेन प्रतिपाद्यत इति। सर्वेति॥ अत्र नियम्यरूपेण नियामकरूपेण तच्छक्ति रूपेण च वर्तमानत्वात् सर्वदेशकालावस्थासु भयेभ्यः त्वाश्रित संरक्षणसामर्थ्यं प्रदर्शितं भवति। दुर्गादेवीति॥ नारायणीपद स्थाने प्रयोगस्तस्यास्ताद्रूप्यप्रतिपादनाय।

एवं स्तुत्वा प्रसन्नायां भगवत्यां तां प्रार्थयन्ति-: एतदिति॥ सौम्यं सोमवत्प्रियदर्शनं। ज्वालेति, अत्र तेजसा स्वरूपेण कर्मणा च क्रमेण शूलस्य भीषणत्वं समर्थितम्। अत्र त्रिशूलं पातु भद्रकाली नमोस्तुत इति

वदद्भिः त्वदनुमति मात्रेनैवास्मान् रक्षितुमिदं शक्नुयात् इति इतरजनायुधवैसादृश्येन सुदर्शनादि पदस्य लोकोत्तरत्वं व्यञ्जितम्। किञ्च त्वामाश्रिता ह्याश्रयतां प्रयान्ति, त्वामाश्रिताः त्वद्भक्ताः तेऽपि त्वामिवन्येषामापद्भिमोचका भवन्ति। एतदिति। महासुराणां यदेतत् कदनं त्वया कृतं एतदन्या का प्रकरोति, न काचिदपि शक्नुयादित्यर्थः। बहुधा बहुप्रकारेण आत्ममूर्तिं कृत्वाऽनेकैः रुपैः बहुधा कृतै ब्रह्माण्यादिविग्रहैः यदेतत् कदनं त्वया कृतमिति पूर्वत्र सम्बन्धः।

एवं शरणागतपरित्राणवैभवमुक्त्वा संप्रति स्वपादकमलभक्तिविधुरणं मोहोत्पादनवैभवं वर्णयन्तः स्तुवन्ति-ः विद्यास्विति॥ विद्यत्सु व्याख्यातेषु, शास्त्रेषु मोहनिवृत्त्युपाय प्रतिपादकेषुशास्त्रेषु, वेदान्तादिषु आद्येषु वाक्येषु तन्मूलभूतेषूपनिषद्वाक्येषु च विवेकदीपेषु आत्मानात्मविवेचनतत्परेषु सत्स्वप्येतद्विश्वं, ममत्वगर्ते अर्थपुत्रकलत्रादिषु मदीयत्वाभिमानो ममत्वं, तद्रूपे गर्तेऽतिमहान्धकारे त्वदन्या का विमोहयति। न कापीत्यर्थः। त्वदुपेक्षकाणां शास्त्रमपि विफलं भवतीति भावः। भक्तानान्त्वितरथेति भावेनाह - रक्षांसीति॥

एवं मुक्तिप्रधानवैभवमनेनोक्तं भवति। संप्रति, भुक्तिप्रदान वैभवाभिप्रायेण स्तुवन्ति- विश्वेशीति॥ त्वं परिपासि विश्वमित्यनेन जगदाप्यायकत्वमुक्तम्। विश्वासात्मकेत्यनेन जगतः तद्व्यतिरेकेणाभावः। धारयसे च विश्वेशवन्द्यी विश्वेशत्वादिमानवद्भिः अस्मदादिभिः भुवाय विभूतये वन्द्या भवति यतः ये त्वयि भक्तिनम्राः ते विश्वाश्रया जगत्स्वामिनो भवन्तीति। अथ भगवतीं प्रार्थयन्ति - देवीति॥ त्रैलोक्यवासिनां लोकानां जनानां यद्वस्तु मनसा ईप्सितं तद्वरं वृणुध्वम्। यद्वा, वरं वृणुध्वं अतिदुर्लभमपि दास्यामीति भावेनाह- यन्मनसा ईप्सितं तत्प्रयच्छामि, इदमेव दातव्यं नेदमिति मम युष्मासु चिन्तेति भावः। अत्र हेतुः जगतामुपकारकमिति। युष्माकं जगदनुग्रहशीलत्वात् तदुपकारमेव हि प्रार्थ्यते इतीप्सितं सर्वमेव दातव्यमितिभावः। अस्मद्वैरिविनाशनं अस्मद्वैरिविनाशनञ्च, तत्र तावत् अस्मद्वैरिविनाशनं कार्यमिति यदुक्तं तत्प्रतिजानीते -ः वैवस्वतेन्तरे इत्यादिना। नेत्राणां शतेन मुनीन्निरीक्षिष्यामि इति, तत्रैव सर्वमुनिषु प्रीतेरविशेषात्।

भक्तवात्सल्यद्योतनाय मय्यवेयं प्रथमं करुणाक्टाक्षं कृतवतीति सर्वेषां पृथक् पृथक् प्रत्ययोद्बोधनाय स्वीकृतानेकनयना तान्मुनीन् निरीक्षिष्यामीति

तत्रैतस्मिन्नेवावतारे, उपसंहरति -: इत्थमिति। सर्वबाधाप्रशमनमित्येतदप्यनेनैव प्रत्युक्तम्। अमरपरिपन्थिपरिहारेणैव सर्वलोकबाधाप्रशमनोपपत्तेः इदमुपपद्यते। अमराणां सर्वलोकपालकत्वादिति।

इति देवीमाहात्म्यव्यारव्यायां गूढार्थदीपिकायामेकादशोऽध्यायः॥

अथ द्वादशोऽध्यायः॥

अथ देव्यैव देवेभ्यो भक्तानुग्रहवाञ्छया।
गुणावतारपरितः स्तोत्रवैभवमुच्यते॥

एभिरित्यादिना॥ अष्टम्यामित्यादि। अत्र गुणावतारत्रयकीर्तनयोग्यदिवस विशेषविधिपरमेतमाहात्म्यं गुणावतारचरितत्रयं विशेषतः सपर्यापूर्वकं च शब्दात् कीर्तयिष्यन्ति च त्रिविधमाध्यात्मिकाधिदैविकाधि भौतिकभेदेन। बलिप्रदाने दुर्गाबलिविधाने, पूजायां पूजावसाने अग्निकार्ये कार्तिकहोमादौ शरत्काले कार्तिकमासवार्षिकी कुळीरमासि च शन्तिकर्मणि आपच्छान्तिकरे कर्मणि क्रियमाणे प्रदरे पर्वतगुहाविशेषे॥

इतिद्वादशोऽध्यायः

अथ त्रयोदशोऽध्यायः॥

गुणावतारचरितमुपसंहियतेऽधुना।
अस्मिंस्त्रयोदशाध्याये मुनीन्द्रेण सुमेधसा॥

एतदितयादिना, स राजा वैश्यश्चेति योज्यम्। अत्र देवीसूक्तशब्देन पञ्चदुर्गोच्यते। देवीसूक्तमिति कस्यचिन्मन्त्रस्य नामेति केचित्। स च सुमेधसोक्तः उपदिष्टः। तं जपन्। ममेति पुत्रादौ अहमितिदेहे च यः सङ्गः रागः अस्य विच्युतिकारकम्। सावर्णिः सूर्यतनय इति हि पुरस्तादुपक्रान्तं स अत्रापि सावर्णो भविता मनुरिति उपसंहारश्च कृतः। तेन चात्र सवर्णशब्दस्य "अजामेकां लोहितशुक्लकृष्णां" इति श्रुतेः गुणसाम्यरुपिण्याः प्रकृतेः वाचकत्वादुपक्रमोपसंहारैकरूप्यादिषड्विधतात्पर्यलिङ्गपर्यालोचनया रक्ष्यैक्य विषयत्वमवधार्यते। सुरथवैश्यौ च तत्सेवया भुक्तिमुक्तिफल साधनत्वरव्यापनयोदाहियेते॥

इति देवीमाहात्म्यव्यारव्यायां गूढार्थदीपिकायां
त्रयोदशोऽध्याय:

या चक्रे मधुकैटभासुरवधं संभूय देहाद्धरे:
या जघ्ने महिषञ्च देवमहसा संभूतदिव्याकृति:।
भूत्वा चन्द्रशिखामणे: प्रियतमा देहा च या सानुगान्
सुम्भादीन निजघान सास्तु सततं भक्त्यै च भक्त्यै च न:॥
श्रीमद्गुरुपादांभोज भावना वासनामयीम्।
सन्त: विमत्सरा: सन्त: शोधयन्तु गिरं मम॥

श्रीगुरुभ्यो नम:

देहीति वचनद्वारा देहस्था: पञ्चदेवता:।
सद्यो निर्यान्ति तं हित्वा ही श्री: धृति कीर्त्तय:॥
कौलदन्ताजले पिष्ट्वा विलिखेन्नेत्रयो: द्वयो:।
सद्य: प्रसूयते नारी नात्र कार्या विचारण॥

शुभमस्तु॥ गुरुभ्यो नम:॥ श्रीमहात्रिपुरसुन्दर्यै नम:॥

ओं श्री कृष्णाय परब्रह्मणे नम:

समामा

Printed by
Royapettah Stationery and Printing and Allied Products Producers Indl. - Co.op Society Ltd.
26, Koya Arunagiri First Street Royapettah
Madras - 600 014. ☎ : 84 56 70

Printed by

Royapettah Stationery and Printing and Allied Products Producers Indl. - Co.op Society Ltd.

26, Koya Arunagiri First Street Royapettah

Madras - 600 014. ☎ : 84 56 70